ISSN : 2347-1565

# संस्कृत–चन्द्रिका

**मासिकी संस्कृत–बाल–पत्रिका**

**वर्षम् १**
**अङ्क ३–५**

**अक्तूबरः–दिसम्बरः**
**२०१३**
(आश्विनः–पौषः)

प्रधानसम्पादकः
**डॉ० धर्मेन्द्रकुमारः**

सहायकसम्पादकः
**प्रद्युम्नचन्द्रः**

## अनुक्रमणिका:

| | | |
|---|---|---|
| १. कर्मप्रतिज्ञा | *डॉ० सन्तोषकुमार शुक्लः* | १ |
| २. संस्कृतशास्त्रेषु समयगणनायाः विषये वैज्ञानिकानि तथ्यानि | *डॉ० जीतरामभट्टः* | २ |
| ३. सङ्घः रक्षति युगे युगे | *डॉ० सौ० शारदा रमेश गाडगे* | ५ |
| ४. शुनः पुच्छम् | *ओम्प्रकाशठाकुरः* | ६ |
| ५. स्वामी दयानन्दविरचित—संस्कृतवाक्यप्रबोधात् | | ७ |
| ६. सामान्य ज्ञानम् | *प्रद्युम्नचन्द्रः* | १२ |
| ७. कृतघ्नेभ्यः साहाय्यं न दातव्यम् | *डॉ० सौ० शारदा रमेश गाडगे* | १५ |
| ८. सत्यवादी बालकः | *सुप्रिया कौशिकः* | १६ |
| ९. कदापि लोभी मा भवतु भवान्! | *कृष्ण प्रसाद उपाध्यायः* | १८ |
| १०. शठे शाठ्यम् समाचरेत् | *प्रद्युम्नचन्द्रः* | १९ |
| ११. यात्रा–मङ्गलम् प्रति | *डॉ० धर्मेन्द्रकुमारः* | २१ |
| १२. मानवजीवने अध्ययनस्योपादेयता | *डॉ० रेनू के० शर्मा* | २५ |
| १३. गीतामृतम् | *दिनेशचन्द्रशर्मा* | २७ |
| १४. अथर्ववेदे शिक्षादर्शनम् | *डॉ० धर्मेन्द्रकुमारः* | २९ |
| १५. वैशेषिक–दर्शनम् | *डॉ० वेदनिधि* | ३४ |
| १६. ''स्वाध्यायान्मा प्रमदः'' | *डॉ० धर्मेन्द्रकुमारः* | ३६ |
| १७. भोजनं कीदृशं भवेत्? | *डॉ० सुधीरकुमारः* | ४० |
| १८. आश्रमचतुष्टयम् | *अजीतकुमारः* | ४२ |
| १९. संस्कृत महाकाव्यों की उत्पत्ति एवं विकास | *डॉ० जगतबहादुरशर्मा* | ४४ |
| २०. कालः अश्वो वहति | *अजीतकुमारः* | ४८ |

**दिल्ली संस्कृत अकादमी**
**( राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः )**
**DELHI SANSKRIT ACADEMY**
**(GOVT. OF N.C.T. OF DELHI)**

**प्रकाशकः**
सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५
दूरभाषः-०११-२३६३५५९२, २३६८१८३५, २३५५५६७६

**सदस्यताशुल्कम्**

| | | |
|---|---|---|
| प्रति-अंकम् | २५ रूप्यकाणि, | $ 1 |
| वार्षिकम् | २५० रूप्यकाणि, | $ 8 |

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
© Delhi Sanskrit Academy, Govt. of N.C.T. of Delhi

**शुल्कप्रदानप्रकारः**
बैंकधनादेशः (डी.डी.), डाकधनादेशः (मनिआर्डर) अथवा सी.टी.सी. चैक माध्यमेन (**सचिव, दिल्लीसंस्कृतअकादमी**पक्षे)

Mode of payment
Demand Draft, Money order or by CTC Cheque
(In favour of Secretary, Delhi Sanskrit Academy)

E-mail ID : delhisanskritacademy@gmail.com
Website : www.delhisanskritacademy.com

मुद्रकः
**भारतसर्वकारस्य मुद्रणालयः,**
मिण्टोरोडः, नव देहली-११०००१

# प्रास्ताविकम्

महदिदं प्रमोदस्थानं, सन्तुष्यतितराञ्च नितरामस्माकं खल्वन्तरङ्गं यदद्य वयं बाल-पत्रिकाम् इमाम्, गीर्वाणवाणीप्रणयिनां तत्रभवतां पाठकानां करकमलेषु सानन्दमुपहरामः।

अयि मान्याः? सहृदयहृदयालवपाठकाः? अस्माभिः सुतरामिदं ज्ञायत एव यत् विश्व-भाषासु विश्ववाङ्मये च संस्कृतभाषायाः संस्कृतसाहित्यस्य च गौरवपूर्णं स्थानं ननु। सच्चिदानन्दकरुणा-वरुणालयस्य परमेश्वरस्य निःश्वासभूता ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेद इति चत्वारो वेदाः देववाण्यामेव विराजन्ते। संस्कृतभाषा विश्वभाषाणां मुकुट-मणिरिव सुस्थापिता।

भाषावैज्ञानिकाः कम्प्यूटर-विदश्च कम्प्यूटरदृष्ट्या संस्कृतभाषां मूर्धनि स्थितां सगर्वं स्वीकुर्वन्ति। अतएव जर्मनी-जापान-इंग्लैण्ड-फ्रांस-अमेरिकादि-प्रमुख राष्ट्रेषु-संस्कृत-भाषा प्राचुर्येण अधीयते-अध्याप्यते च। संस्कृतग्रन्थानां शोधकार्यं सर्वत्र चलति। अतो धन्या वयं भारतीयाः, संस्कृत-भाषाम् इमां सम्प्राप्य।

संस्कृतभाषा-भारतीयजनानां हृदयतत्त्वं वरीवर्त्ति। एषा भाषा साहित्य-सौन्दर्यानुभूतेः प्रबलमापदण्डरूपा खलु। अनया भाषया भारतीयभाषाणां विभिन्नललितपक्षैः भावनात्म-कैक्यम् दृढीकरणे महत् योगदानम् आचरितम्।

अनया सुरगिरा स्वनानाविधचिन्तनेन भावना-उपलब्धिभिः राष्ट्रजीवनं घनीभूतं कृतं ननु। संस्कृतस्य सुललितसाहित्येनैव भारतीयसाहित्यं विश्ववाङ्मये गौरवपूर्णं स्थानं प्राप्नोत्।

सुरगिरः प्रौढतासमक्षं विश्वस्यान्या भाषा न स्थातुं शक्नुवन्ति। अस्माकं परमं पुनीतं कर्तव्यमस्ति यदस्या भाषाया व्यापकप्रचारप्रसारं विधाय अस्याः कीर्त्तिं गगनमण्डले नयेम। संस्कृतभाषा मनोरममेकमुद्यानमस्ति यस्मिन् सुन्दराणि, सुगन्धयुक्तानि कुसुमानि (ग्रन्थाः काव्यादीनि) शोभन्तेतराम्। यत् सुरुचिपूर्णं साहित्यं संस्कृते विद्यते तस्याभिव्यक्तिं कुर्याम।

वर्तमानकाले प्रायेण छात्राः तेषां शिक्षकाश्च संस्कृतव्यवहारपराङ्मुखाः दरीदृश्यन्ते। एतेन भाषायाः सम्यग् बोधाभावे शास्त्रतत्त्वमपि स्फुटं नैव अवगम्यते। अयं संस्कृतभाषा-व्यवहारः सर्वत्र विद्यालयेषु-महाविद्यालयेषु-विश्वविद्यालयेषु च स्यात्। एतदेव तथ्यं मनसिकृत्य अस्याः संस्कृतपत्रिकायाः प्रथमं प्रकाशनं प्रारभ्यते-अस्माभिः। इदमेव च दिल्ली-संस्कृत-अकादम्याः प्रमुखं लक्ष्यमस्ति।

यद्यपि संस्कृतभाषायाः सत्साहित्यस्य च समभ्युदयार्थं समुन्नयनार्थं प्रयासरता 'संस्कृत-मञ्जरी' त्रैमासिकी पत्रिकेयं दिल्ली-संस्कृत-अकादम्या सततं प्रकाश्यते परं सा प्रायेण शोधनिबन्धान् अधिकृत्य एव प्रकाशमाना दृश्यते। अतो हेतोः अस्माभिः निर्णीतम् यत् बालानाम् कृते अपि अतिसरला नातिकठिना पत्रिका स्यात् इत्येवमर्थं पत्रिका एषा प्रारभ्यते। छात्राणाम् कृते यदुपयोगि सत्साहित्यं चकास्ति संस्कृतवाङ्मये तस्याभिव्यक्तिं वयं कर्त्तुमिच्छामः।

छात्राणाम् संस्कारयुक्तमाचरणम्, संस्कृतयुक्ता शिक्षा-पद्धतिः, आचारः, विचारः

भगवद् भजनयुक्तम्, जीवनम् कर्त्तुमिच्छाम वयं चेत् स्वजीवनं राष्ट्रजीवनम्, सामाजिक-परिस्थितिं, गतिविधिं क्रियाकलापमधिकं परिष्कृतं, समृद्धं सुन्दरञ्च कर्त्तुम् अस्माभिः देववाणी सर्वथा समर्पणभावेन कटिबद्धाः भूत्वा स्वीकार्या एव। तदैवास्माकं समाजः राष्ट्रज्ञानं सर्वदिक्षु पूर्णतां यास्यति। संस्कृतभाषायाः तद्विशालसाहित्यस्य च प्रचारः सततं वृद्धिं गच्छेत् तदैव वयं स्वाक्षुण्णनिधिं सुस्थिरं कर्त्तुं प्रभविष्यामः।

दिल्ली-संस्कृत-अकादमी कामयते यदयमस्माकं प्रयासः विश्वभाषाणां जननीं संस्कृतभाषामलंकृतां विकसिताञ्च करोतु।

मन्येऽहम् पत्रिकेयम् संस्कृतविदुषाम् असंख्याकानां छात्राणाम् रसिकानाञ्च कृते गीर्वाणवाङ्मयपरिचयार्थम् सुतरां सोपकारिका हितावहा ज्ञानवृद्धिकराश्च भवितेति न मे लेशतोऽपि सन्देहः।

इति शं शुभञ्च भूयात्।

—विदुषां वशंवदः

**धर्मेन्द्रकुमारः**

# कर्मप्रतिज्ञा

**—डॉ० सन्तोषकुमार शुक्लः**

स्वात्मानं चिन्तयेत् पूर्वं कुलं चैव तथोत्तरम्।
ततश्च देशं राष्ट्रञ्च नात्मानमवसादयेत्॥ १ ॥

बहुकर्माणि कुर्वीत प्रसन्नवदनः सदा।
उत्साहेनापि सर्वाणि मनोयोगेन त्वाचरेत्॥ २ ॥

सर्वः सर्वं न जानाति एतत्तु निश्चयप्रचम्।
तथापि सर्वं ज्ञातुञ्च सर्वदैव प्रचेष्टताम्॥ ३ ॥

कार्यं विश्लेषयेत् पूर्वं ततश्चर्यां विचारयेत्।
कार्यमारभ्य नूनं तु नैव किञ्चिच्च चिन्तयेत्॥ ४ ॥

'श्रेयांसि बहुविघ्नानि' निधाय हृदये तथा।
विपरीतेषु कालेषु चानुकूलं हि चिन्तयेत्॥ ५ ॥

*—सह आचार्यः,*
*विशिष्ट संस्कृत अध्ययन केन्द्रम्,*
*जवाहरलालनेहरुविश्वविद्यालयः,*
*नव देहली*

—:: ०:: —

# संस्कृतशास्त्रेषु समयगणनायाः विषये वैज्ञानिकानि तथ्यानि

—डॉ० जीतरामभट्टः

बालाः! भवन्तः जानन्ति एव यत् सप्ताहस्य सप्त दिवसानां पृथक् पृथक् नामानि सन्ति–रविवारः, सोमवारः, मंगलवारः, बुधवारः, गुरुवारः, शुक्रवारः शनिवारः च। एतेषाम् आंग्लनामानि अपि समानार्थकानि सन्ति। अन्यासु भाषासु अपि अनेन क्रमेण एव वाराणां नामानि सन्ति। किन्तु, एतेषां नामनिर्धारणं कथं जातं, किं भवन्तः अस्मिन् विषये जानन्ति? वस्तुतः वैदिककालतः एव एतेषां इमानि नामानि ऋषिभिः निर्धारितानि सन्ति। अस्मिन् विषये वैज्ञानिकानि तथ्यानि प्राचीन वेदांगज्योतिषग्रन्थेषु लिखितानि सन्ति यत् खगोले ग्रहाणां क्रमे स्थितिः एतादृशी विद्यते—पृथ्वीतः अग्रक्रमे चन्द्रमा, पश्चात् बुधः, तत्पश्चात् शुक्रः, तदनन्तरं सूर्यः, तेभ्यः उपरि क्रमशः मंगलः, गुरुः, अन्ते च शनिः अस्ति। एतेषां गृहाणां क्रमे सूर्योदयात् प्रत्येकं ग्रहस्य एकः एकः होरा (१ घण्टा)कालः भवति। होरा शब्दः अहोरात्रस्य संक्षिप्तं नाम वर्तते। यतः एकस्मिन् अहोरात्रे चतुर्विंशतिः होराः(घण्टाः) भवन्ति। प्रथमे दिने यस्य ग्रहस्य होराक्रमः सूर्योदयात् प्रारभ्यते आगामिदिने तस्मात् ग्रहात् चतुर्थस्य ग्रहस्य होराक्रमः भवति। वस्तुतः होराक्रमपरिभ्रमणं मण्डले भवति। चक्राकारक्रमे सूर्यस्य होराक्रमानन्तरं द्वयोः पार्श्वयोः शुक्रमंगलयोः होराक्रमः स्तः। मण्डलस्य स्थितिः एवं भवति—

इत्थं यदि प्रथमे दिवसे सूर्योदये प्रथमः होरा (घण्टा) सूर्यस्य भवति चेत् तस्य दिनस्य नाम रवि(सूर्य) वारः भवति। तर्हि द्वितीये दिने चतुर्विंशतिः होरा(घण्टा)—अनन्तरं सूर्योदयस्य प्रथमः होरा(घण्टा) चन्द्रस्य भवति, अतः तस्य दिनस्य नाम सोम(चन्द्र)वारः भवति। तत्पश्चात् तृतीये दिने चतुर्विंशतिः होरा(घण्टा)—अनन्तरं सूर्योदयस्य प्रथमः होरा(घण्टा) मंगलस्य भवति, अत एव तस्य दिनस्य नाम मंगलवारः भवति। एवमेव अन्येषां ग्रहाणां क्रमः भवति तदाधारितानि एव तेषां दिनानां नामानि भवन्ति।

वस्तुतः अस्मिन् संसारे समयगणनायाः प्रारम्भः भारतीयैः ऋषिभिः वैदिककाले एव विहितः। समयस्य यादृग् वैज्ञानिकं चिन्तनं भारतीयैः कृतं तादृक् अन्यत्र न अभवत्। यद्यपि कालानुक्रमे पश्चात् भारतस्य अनुकरणं कृत्वा अन्यदेशवासिभिः अपि अस्मिन् विषये प्रयासाः कृताः यथा पाश्चात्याः वदन्ति यत् कालविभाजनस्य सेकेण्डस्य

प्रथमागणनारचना १५६४ त: १६४२ ख्रीष्टाब्दमध्ये गैलिलियो इति विदुषा कृता। किन्तु ते एतत् नहि जानन्ति यत् भारतीयैः तु सहस्रवर्षेभ्यः पूर्वम् एव सेकेण्डात् अपि न्यूनतमस्य निमेषात् अपि न्यूनतमस्य लवस्य लवात् अपि न्यूनतमभागस्य गणना त्रुटिनाम्ना कृता आसीत्। महाभारते समयस्य षोडश अवयवाः वर्णिताः सन्ति। अस्मिन् विषये महाभारतस्य निम्नलिखितान् श्लोकान् पश्यन्तु—

**काष्ठा निमेशा दशपंच चैव त्रिंशत् काष्ठा गणयेत् कलां ताम्।**
**त्रिंशत् कलाश्चापि भवेन्मुहूर्तो भागः कलायाः दशमश्च यः स्यात्।**
**त्रिंशन्मुहूर्तन्तु भवेदहश्च रात्रिश्च संख्या मुनिभिः प्रणीताः।**
**मासः स्मृतो रात्र्यहनी च त्रिंशत् संवत्सरो द्वादशमास उक्तः।**
**संवत्सरे द्वे त्वयने वदन्ति संख्याविदो दक्षिणमुत्तरंच॥** —महाभारतम्

कालगणनायाः विषये अस्मिन् श्लोके विस्तरेण प्रतिपादितम् अस्ति। तात्पर्यमिदम् अस्ति यत्—

एकस्मिन् **वर्षे** द्वे अयने भवतः।
एकस्मिन् **अयने** षट् मासाः भवन्ति।
एकस्मिन् **वर्षे** द्वादश मासाः भवन्ति।
एकस्मिन् **मासे** द्वौ पक्षौ भवतः।
एकस्मिन् **पक्षे** पंचदश दिवसाः भवन्ति।
एकस्मिन् **पक्षे** द्वौ सप्ताहौ भवतः।
एकस्मिन् **सप्ताहे** सप्त दिनानि भवन्ति।
एकस्मिन् **दिने** (अहोरात्रे) पंचदश मुहूर्ताः भवन्ति।
एकस्मिन् **मुहूर्ते** द्वे नाडिके भवतः।
एकस्यां **नाडिकायां** चत्वारिंशत् कलाः भवन्ति।
एकस्यां **कलायां** दश काष्ठाः भवन्ति।
एकस्यां **काष्ठायां** पंच निमेषाः भवन्ति।
एकस्मिन् **निमेषे** द्वौ लवौ भवतः।
एकस्मिन् **लवे द्वे** त्रुट्यौ भवतः।
एकस्याः **त्रुट्याः** परिमाणः चतुर्थांश निमेषः भवति।

तिसृणां त्रसरेणूनां पारगमने यावन्मात्रायां सूर्यकिरणानां समयः भवति, सः एव समयः त्रुटिनाम्ना ज्ञायते।

इत्थं समयस्य न्यूनतमा परिमाणगणना भारतीयैः पुराकाले सहस्रेभ्यः वर्षेभ्यः पूर्वम् एव कृता, किन्तु प्रवृत्तिवशाद् भारतीया अपि अस्मिन् विषये पाश्चात्यानाम् एव योगदानं स्वीकुर्वन्ति एषा विडम्बना वर्तते। संस्कृतशास्त्रेषु एवम् एव अनेकानि वैज्ञानिकानि तथ्यानि सन्ति येषाम् चिन्तनं ऋषिभिः कृतम् किन्तु अनुसन्धानाभावे लोकोपयोगाय तेषाम् उद्घाटनं अद्यावधिपर्यन्तं नहि जातम्। अतः भवन्तः छात्राः यदि राष्ट्रभक्तिं चिन्तयन्ति विश्वे भारतस्य गौरवम् च उन्नेतुं विचारयन्ति तर्हि संस्कृतं पठन्तु। तकनीकिविज्ञानादिविषयैः सह संस्कृतशास्त्राणाम् अपि अध्ययनं, शोधं प्रायोगिकं कार्यं च कृत्वा भारतीय-ऋषिभिः चिन्तितं ज्ञान विज्ञानं च संसारे प्रसारयन्तु।

*निदेशकः*
*डॉ० गोस्वामी गिरिधारी लाल प्राच्यविद्याप्रतिष्ठानम्*
*दिल्लीसर्वकारः*

—:: ०:: —

# सङ्घः रक्षति युगे युगे

—डॉ० सौ० शारदा रमेश गाडगे

आसीत् कस्मिंश्चित् वने चपला नाम्नी काऽपि वानरी। तस्याः पुत्रः आसीत् एकलः अनलः नाम। सः अतीव चतुरः बुद्धिमान् च आसीत्। एकदा सः मात्रा सह जलं पातुं नदीतीरं प्रस्थितः। अत्रान्तरे कोऽपि सिंहः दूरात् वेगेन आगत्य तं गृहीतवान्। सिंहस्य उग्रं रूपं दृष्ट्वा भयभीतः सः बालवानरः महता चातुर्येण तस्य मृगेन्द्रस्य ग्राहात् आत्मानं मोचयित्वा पलायितः। सिंहः तं ग्रहीतुं वेगेन तम् अनुधावितवान्। एतद् सर्वं दृष्ट्वा अगतिका असहाया वानरी किञ्चित् विमृश्य सत्वरं तेषां नायकं प्रति गता। तं प्रणम्य सा अवदत्—''महाराज! मम पुत्रः सिंहेन गृहीतः। तं रक्षतु। कृपया साहाय्यं करोतु। अहं भवतः उपकारं कदापि न विस्मरिष्यामि॥''

चपलायाः विज्ञप्तिं श्रुत्वा वानरनायकः तस्याः दुःखं सङ्कटं च अवगतवान्। सः अनुक्षणमेव सर्वान् वानरान् आहूय अनलस्य सङ्कटस्य विषये अकथयत् अवदत् च—''सर्वैः मिलित्वा सः सिंहः व्यापादितव्यः। अनलस्य साहाय्यं सर्वैः करणीयम्। अस्माकं कर्तव्यमेतद्।'' एतद् श्रुत्वा कश्चित् युवा वानरः अवदत्—''न मे रोचते भवतः विचारः। सः अनलः आत्मानं अतिचतुरं मन्यते। स स्वसंरक्षणं स्वयमेव करोतु।''

एतद् श्रुत्वा सः कपिवीरः क्रोधेन अवदत्—''मा मा एवम्। वयं वानराः। न मानवाः। मानवाः परस्परसाहाय्यं न कुर्वन्ति। अन्यं सङ्कटे दृष्ट्वा मनुष्यः आनन्दितः भवति, न वयम्। एषः अनलः न केवलम् अस्याः भगिन्याः पुत्रः अपि तु अस्माकं सर्वेषाम्। अस्माभिः सम्मिल्य स रक्षणीयः सिंहः च दण्डनीयः। अस्माभिः सङ्घशक्तिः तस्मै दर्शनीया एव। अन्यथा सः दुष्टः अस्मासु कमपि व्यापादयेत्। अतः आगच्छन्तु मया सह।''

नेतुः आज्ञाम् अनुसृत्य ते सर्वे वानराः चपलया सह गताः। तैः सर्वैः मिलित्वा सः सिंहः व्यापादितः अनलः च रक्षितः। चपला पुत्रं परिष्वज्य आनन्दाश्रुभिः तं स्नापयन्ती सर्वेभ्यः वारंवारं साधुवादान् प्रदाय स्वनिवासस्थानं प्रस्थिता।

*—१९बी, भांगेविहारः,*

*त्रिमूर्तिनगरम्, नागपुरम्–२२*

# शुनः पुच्छम्

—ओम्प्रकाशठाकुरः

एकस्मिन् प्रदेशे एकः काष्ठहारकः आसीत्। स एकस्यां जीर्णकुट्यां निवसति स्म। वनात् इन्धनानि छित्त्वा विक्रीय च स्वप्राणयात्रां समाचरति स्म।

स प्रकृत्या अलसः अनुद्यमः च आसीत्। स सदा चिन्तयति स्म, यदि कश्चित् भूतः प्रेतो वा मम वशवर्ती स्यात्, स मम सर्वाणि अभीष्टानि सद्यः एव साधयेत्, अहं च नानाभोगान् भुञ्जानः विलासशय्यायां च शयानः संसारस्य सुखानि अनुभवेयम्।

तस्य कुट्याः अनतिदूरे एकः ऐन्द्रजालिकः वसति स्म। असौ काष्ठजीवी एकदा तम् उपगम्य अवदत्—अहं भवतः प्रतिवेशी अस्मि। मया श्रुतं यत् भूत-प्रेतादयः भवतः वशवर्तिनः सन्ति। भवान् तेषां सहायतया अचिरेण सर्वाणि अभीष्टानि साधयति। यदि भवतः अनुग्रहः स्यात्, ममापि कार्याणि निमेषमात्रेण भवितुम् अर्हन्ति। कृपया सेवाकर्मणि दक्षम् एकं भूतं मम वशवर्तिनं करोतु भवान्।

ऐन्द्रजालिकः उवाच—अहं तुभ्यं भूतं तु दास्यामि, किन्तु स कदापि अकर्मण्यः न तिष्ठति। यदि त्वं तं कार्ये न नियोजयिष्यसि, स त्वां खादिष्यति। काष्ठहारकः मुदितो भूत्वा अवदत्, अलं शङ्कया। अहं सर्वदा तं कार्येषु व्यस्तं करिष्यामि।

पुनः पुनः तस्यानुरोधात् दयमानः ऐन्द्रजालिकः तस्मै एकं भूतम् अयच्छत्। स तेन सह कुट्यां प्राप्तः।

कुटीम् उपेत्य भूतः अकथयत् स्वामिन्! कार्यम् उच्यताम्। स्वामी आदिशत्, मम कुटीं प्रासादं कुरु। निमेषमात्रेण तस्य कुटी—प्रासादे परिणता जाता। ततः स तं वनानि छेत्तुम् आदिशत्। अल्पेन कालेन वनानि छिन्नानि अभवन्। तत्पश्चात् स नवीननगरनिर्माणाय तम् आदिष्टवान्।

नगरे निर्मिते जाते स काष्ठहारकः विश्वभ्रमणस्य कामनां प्राकटयत्। तेन भूतेन स विश्वभ्रमणं कारितः।

काष्ठहारकस्य सर्वम् ईप्सितं पूर्णं जातम्। पुनः कार्यं पृष्टः स किंकर्तव्यविमूढः सन् प्राणहानिभीतः ईश्वरम् अस्मरत्। तदा तस्य दृष्टिः समीपस्थे एकस्मिन् कुक्कुरे अपतत्।

स भूतम् आदिशत्, कुक्कुरस्य अस्य वक्रं पुच्छं सरलं कुरु। भूतः तत्क्षणं लाङ्गूलस्य सरलीकरणे प्रवृत्तो जातः, किन्तु साफल्यं न प्राप। भूतः श्रान्तो भूत्वा पराजयं स्वीचकार। किन्तु तत्स्वामी दृढतया अभाषत, आदिष्टं कर्म समाचर। स भूतः तदादेशं पालयन् अद्यापि वक्रं शुनः पुच्छं सरलीकर्तुं प्रयतते।

*— डी-७५७, सरस्वती विहारः,*
*दिल्ली-११००३४*

# स्वामी दयानन्दविरचित—
# संस्कृतवाक्यप्रबोधात्

**उद्धृतः प्रथमोऽध्यायः**

## १. गुरुशिष्यवार्तालापप्रकरणम्

## 1. Conversation between the Teacher and the Student

1. **संस्कृतः**:- भोः शिष्य उत्तिष्ठ प्रातःकालो जातः।
   **हिन्दी**:- हे शिष्य! उठ सवेरा हुआ।
   **English:-** Student! Get up. It is morning.
2. उत्तिष्ठामि।
   उठता हूँ।
   I am getting up.
3. अन्ये सर्वे विद्यार्थिन उत्थिता न वा?
   और सब विद्यार्थी उठे या नहीं?
   Have all other students got up or not?
4. अधुना तु नोत्थिताः खलु।
   अभी तो नहीं उठे हैं।
   So far, they haven't got up.
5. तानपि सर्वानुत्थापय।
   उन सब को भी उठा दे।
   Get all of them up also. (= Awaken/waken/wake all of them also).

6. सर्व उत्थापिताः।

सब उठा दिये।

All have been awakened / wakened/woken.

7. सम्प्रत्यस्माभिः किं कर्त्तव्यम्?

इस समय हमको क्या करना चाहिये?

What shall (=should) we do now?

8. आवश्यकं शौचादिकं कृत्वा सन्ध्यावन्दम्।

आवश्यक शरीरशुद्धि करके सन्ध्योपासना।

(You should) offer benedictory prayers to God after carrying out essential cleanliness, etc. of the body.

9. आवश्यकं कृत्वा सन्ध्योपासिताऽतः परमस्माभिः किं करणीयम्?

आवश्यक कर्म करके सन्ध्योपासना कर लिया, इसके आगे हम को क्या करना चाहिए?

We have offered benedictory prayers after carrying out morning essentials. What shall (=should) we do hereafter?

10. अग्निहोत्रं विधाय पठत।

अग्निहोत्र करके पढ़ो।

Carry out studies after performing *yajna*.

11. पूर्वं किं पठनीयम्?

पहिले क्या पढ़ना चाहिये?

What shall (=should) we study first?

12. वर्णोच्चारणशिक्षामधीध्वम्।

वर्णोच्चारणशिक्षा को पढ़ो।

Study <u>Phonetics</u> (=the book teaching the pronunciation of letters, etc.)

13. पश्चात्किमध्येतव्यम्?

पीछे क्या पढ़ना चाहिये?

What should be read thereafter?

14. किंचित्संस्कृतोक्तिबोधः क्रियताम्।

कुछ संस्कृत बोलने का ज्ञान किया जाय।

Acquire some knowledge in spoken Sanskrit.

15. पुनः किमभ्यसनीयम्?

फिर किसका अभ्यास करना चाहिये?

What should be practised thereafter?

16. यथायोग्यव्यवहारानुष्ठानाय प्रयतध्वम्।

यथोचित व्यवहार करने के लिए प्रयत्न करो।

Try to comply with the rules of proper etiquette.

17. कुतोऽनुचितव्यवहारकर्तुर्विद्यैव न जायते।

क्योंकि उलटे व्यवहार करने वाले को विद्या ही नहीं होती।

Because one who violates etiquette does not acquire knowledge and learning.

18. को विद्वान् भवितुमर्हति?

कौन मनुष्य विद्वान् होने के योग्य होता है?

Who is fit to be <u>a scholar</u> (= scholarly)? OR Who can become <u>scholarly</u> (=a scholor)?

19. यः सदाचारी प्राज्ञः पुरुषार्थी भवेत्।

जो सत्याचरणशील, बुद्धिमान्, पुरुषार्थी हो।

One who is virtuous, wise and industrious.

20. कीदृशादाचार्यादधीत्य पण्डितो भवितुं शक्नोति?

कैसे आचार्य से पढ़ के पण्डित हो सकता है?

Learning from what kind of teacher can one become a scholar?

21. अनूचानतः।

पूर्ण विद्यावान् वक्ता से।

From one who is highly learned and articulate.

22. अथ किमध्यापयिष्यते भवता?

अब आप इसके अनन्तर हमको क्या पढ़ाइयेगा?

What will you teach hereafter?

23. अष्टाध्यायीमहाभाष्यम्।

अष्टाध्यायी और महाभाष्य।

*Ashtadhyayee* and *Mahabhashyam.*

24. किमनेन पठितेन भविष्यति?

इसके पढ़ने से क्या होगा?

What will be the benefit of studying this?

25. शब्दार्थसम्बन्धविज्ञानम्।

शब्द अर्थ और सम्बन्धों का यथार्थबोध।

(One acquires) knowledge of words, their meanings and their inter-relationship

26. पुनः क्रमेण किं किमध्येतव्यम्?

फिर क्रम से क्या-क्या पढ़ना चाहिये।

What is the next in order for studying?

27. शिक्षाकल्पनिघण्टुनिरुक्तछन्दोज्योतिषाणि वेदानामङ्गानि मीमांसावैशेषिक-न्याययोगसांख्यवेदान्तान्युपाङ्गान्यायुर्धनुर्गान्धर्वार्थानुपवेदानैतरेयशतपथ-सामगोपथब्राह्मणान्यधीत्य ऋग्यजुस्सामाऽथर्ववेदान् पठत।

शिक्षा, कल्प, निघण्टु, निरुक्त, छन्द और ज्योतिष वेदों के अंग। मीमांसा, वैशेषिक न्याय, योग, सांख्य और वेदान्त उपाङ्ग आयुर्वेद, धनुर्वेद, गान्धर्ववेद, और अर्थवेद उपवेद। ऐतरेय, शतपथ, साम और गोपथ ब्राह्मण ग्रन्थों को पढ़के ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेद को पढ़ो।

Having read the Vedangas, *i.e.*, Shiksha, Kalpa, Nighantu, Nirukta, Chhand (prosody), Jyotish (Astronomy) and the Upangas *i.e.* Meemansa, Vaisheshika, Nyaya, Yoga, Sankhya and Vedanta and Upavedas *i.e.* Ayurveda, Dhanurveda, Gandharvaveda and Arthaveda, and Brahmanas, *i.e.,* Aitraya, Shatpath, Sama and Gopatha, you should read the Rigveda, the Yajurveda, the Samaveda and the Artharvaveda.

28. एतत्सर्वं विदित्वा किं कार्य्यम्?

इन सबको जान के फिर क्या करना चाहिये?

Having acquired all this knowledge what should be done next?

29. धर्मजिज्ञासाऽनुष्ठाने एतेषामेवाऽध्यापनं च।

धर्म के जानने की इच्छा तथा उसका अनुष्ठान और इन्हीं को सदा पढ़ाना।

Develop an urge for knowing *dharma* (=righteousness), practising it and then teaching it.

# सामान्य ज्ञानम्

—प्रद्युम्नचन्द्रः

१. किं भवन्तः जानन्ति यत् श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वात् सन्निहिताऽस्ति?

२. किं भवन्तः जानन्ति यत् ''निरुक्त'' इति ग्रन्थस्य रचनाकारस्य नाम ''यास्क'' अस्ति?

३. किं भवन्तः जानन्ति यत् 'सूत्रधारः' इति पात्रस्य सम्बन्धः नाटकात् अस्ति?

४. किं भवन्तः जानन्ति यत् गायत्री मन्त्रस्य उपास्य देवता 'सविता' (सूर्यः) अस्ति?

५. ''ऊं भूर्भुवः स्वः तत् सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्'' अयं गायत्री मन्त्र रूपेण ज्ञायते?

६. किं भवन्तः जानन्ति यत् शिक्षायां गुरुकुलपरम्परायाः प्रणेता महर्षिदयानन्द सरस्वती-महोदयाः आसन्?

७. न्यायदर्शनम् 'अक्षपाददर्शनम्' इति नाम्ना अपि ज्ञायते।

राजभाषा—२६ जनवरी १९६५ तः भारतीय संघस्य राजभाषा रूपेण देवनागरी लिप्यां ''हिन्दी-भाषा'' स्वीकृतवती। केन्द्रसर्वकारेण एतत् अपि स्वीकृतं यत् राजभाषा अधिनियमे १९६३ अन्तर्गते हिन्दी भाषायाः अतिरिक्तं अंग्रेजी भाषायां अपि १९६५ वर्षस्य २६ जनवरी तिथ्याः अनन्तरम् अपि कार्यं निर्बाधरूपेण प्रचलिष्यति। भारतीय संविधानस्य अष्टमम् अनुसूच्याम् उल्लिखितानाम् भाषाणाम् विवरणम् एतत् प्रकारेण अस्ति—

| | | |
|---|---|---|
| १. असमिया | २. बंगला | ३. गुजराती |
| ४. हिन्दी | ५. कन्नड़ | ६. कोंकणी |
| ७. कश्मीरी | ८. मलयालम | ९. मणिपुरी |
| १०. मराठी | ११. नेपाली | १२. उड़िया |
| १३. पंजाबी | १४. संस्कृत | १५. सिन्धी |
| १६. तमिल | १७. तेलगु | १८. उर्दू |
| १९. बोडो | २०. मैथिली | २१. संथाली |
| २२. डोगरी | | |

**प्रसिद्धानां कृतीनां सामान्यपरिचयः—**

**सत्यार्थप्रकाशः**

**रचनाकारः** महर्षिदयानन्दः सरस्वती

**रचनासमयः** प्रथम संस्करणम् सन् १८७५ एवं द्वितीयसंस्करणं-१८८२ ईसवीय वर्षे

**वर्णितविषयः** आर्यसमाजस्य सिद्धान्तानां परिचयः, सत्यस्य सत्यरूपेण तथा मिथ्यायाः मिथ्यारूपेण प्रतिपादनं तथा तात्कालिक समाजे प्रचलितानां अन्धविश्वासानां भ्रान्तिनां पूर्णरूपेण निराकरणं कृत्वा जनजागरणम्। अस्मिन् ग्रन्थे बालशिक्षा, अध्ययन-अध्यापनं, विवाह एवं गृहस्थजीवनस्य, वानप्रस्थ-नियमानां परिचयः, संन्यास-राजधर्म-ईश्वर-सृष्टि-उत्पत्ति, वन्ध-मोक्ष, आचार-अनाचार आदि विषयानां गहनपरिचयम् एवम् आर्यावर्तदेशीय मतमतान्तर—ईसाईमतस्य तथा इस्लाम आदि मतानां तुलनायां आर्य-सिद्धान्तानां प्रासंगिकता। सत्यार्थप्रकाशे प्रत्येके समुल्लासे वर्णिताः विषयाः—

**प्रथमे समुल्लासे**—ईश्वरनामव्याख्या एवं मंगलाचरण समीक्षा।

**द्वितीये समुल्लासे**—बालशिक्षाविषयः, भूतप्रेतादिनेषेध एवं जन्मपत्रसूर्यादिग्रहसमीक्षा।

**तृतीये समुल्लासे**—अध्ययन-अध्यापनविषयः, गुरुमन्त्रव्याख्या, प्राणायामशिक्षा, सन्ध्याग्निहोत्रोपदेशः, यज्ञपात्राकृतयः, उपनयनसमिक्षा, ब्रह्मचर्योपदेशः, ब्रह्मचर्यकृत्यवर्णनम्, पंचधा परीक्ष्याध्ययविधिः, ग्रन्थप्रामाण्याप्रमाण्यविषयः, स्त्रीशूद्राध्ययनविधिः।

**चतुर्थे समुल्लासे**—समावर्तनविषयः, दूरदेशे विवाहकरणम्, विवाहे स्त्रीपुरुषपरीक्षा, अल्पवयसि विवाहनिषेधः, गुणकर्मानुसारेण वर्णव्यवस्था, विवाहलक्षणानि, स्त्रीपुरुष-व्यवहारः, पंचमहायज्ञाः, पाखण्डतिरस्कारः, प्रातरुत्थानम्, पाखण्डिलक्षणानि, गुहस्थधर्माः, पण्डितलक्षणानि, मूर्खलक्षणानि, पुनर्विवाहविचारः, नियोगविषयः, गुहाश्रमश्रैष्ठ्यम्।

**पंचमे समुल्लासे**—वानप्रस्थाश्रमविधिः, संन्यासश्रमविधिः।

**षष्ठे समुल्लासे**—राजधर्मविषयः, सभात्रयकथनम्, राजलक्षणानि, दण्डव्याख्या, राजकर्तव्यम्, अष्टादशव्यसननिषेधः, मन्त्रिदूतादिराजपुरुषलक्षणानि, मन्त्र्यादिषु कार्य-नियोगः दुर्गनिर्माणव्याख्या, युद्धकरणप्रकारः, राज्यरक्षणादिविधिः, ग्रामाधिपत्यादिवर्णनम्, करग्रहणप्रकारः, आसनादिषड्गुणव्याख्या, राज्ञो मित्रोदासीनशत्रुषु वर्त्तनम्, शत्रुभिर्युद्धकरणप्रकारश्च, व्यापारादिषु राजभागकथनम्, अष्टादशविवादमार्गेषु धर्मेण न्यायकरणम्, साक्षिकर्तव्योपदेशः, साक्ष्यानृते दण्डविधिः, चौर्य्यादिषु दण्डादिव्याख्या।

**सप्तमे समुल्लासे**—ईश्वरविषयः, ईश्वरस्तुतिप्रार्थनोपासनाः, ईश्वरज्ञानप्रकारः,

ईश्वरस्यास्तित्वम्, जीवस्य स्वातन्त्र्यम्, जीवेश्वरयोर्भिन्नत्ववर्णनम्, ईश्वरस्य सगुण-निर्गुणकथनम्, वेदविषयविचारः।

**अष्टमे समुल्लासे**—सृष्ट्युत्पत्त्यादिविषयः, ईश्वरभिन्नाया प्रकृतेरुपादानकारणत्वम्, सृष्टौ नास्तिकमतनिराकरणम्, मनुष्याणामादिसृष्टेः स्थानादिनिर्णयः, आर्य्यम्लेच्छादिव्याख्या, ईश्वरस्य जगदाधारत्वम्।

**नवमे समुल्लासे**—विद्याऽविद्याविषयः, बन्धमोक्षविषयः।

**दशमे समुल्लासे**—आचाराऽनाचारविषयः, भक्ष्याऽभक्ष्यविषयः।

**एकादशे समुल्लासे**—आर्यावर्त्तदेशीयमतमतान्तरखण्डनमण्डनविषयः, मन्त्रादि-सिद्धिनिराकरणम्, वाममार्गनिराकरणम्, अद्वैतवादसमीक्षा, भस्मरुद्राक्षतिलकादिसमीक्षा, वैष्णवमतसमीक्षा, मूर्तिपूजासमीक्षा, कालियाकन्तसोमनाथादिसमीक्षा, द्वारकाज्वाला-मुखीसमीक्षा, हरद्वारबदरीनारायणादिसमीक्षा, गंगास्नानादिसमीक्षा, अष्टादशपुराणसमीक्षा, शिवपुराणसमीक्षा, भागवतसमीक्षा, सूर्य्यादिग्रहणसमीक्षा, और्ध्वदैहिकदानादिसमीक्षा, एकादश्यादिव्रतसमीक्षा, मारणमोहनोच्चाटनवाममार्गसमीक्षा, शैवमतसमीक्षा, कबीर-पन्थसमीक्षा, नानकपन्थसमीक्षा, दादूपन्थसमीक्षा, गोकुलिगोस्वामीमतसमीक्षा, स्वामी-नारायणमतसमीक्षा, माध्वलिंगाङ्कितब्राह्मप्रार्थना-समाजादिसमीक्षा, आर्यसमाजविषयः, तन्त्रादिविषयकप्रश्नोत्तराणि, ब्रह्मचारिसंन्यासिसमीक्षा, आर्यावर्त्तीयराजवंशावली।

**द्वादशे समुल्लासे**—नास्तिकमतसमीक्षा, चार्वाकमतसमीक्षा, चार्वाकादिनास्तिकभेदाः, बौद्धसौगतमतसमीक्षा, जैनबौद्धयोरैक्यम्, आस्तिकनास्तिकसंवादः, जगतोऽनादित्वसमीक्षा, जैनमते भूमिपरिमाणम्, जीवादन्यस्य जडत्वं पुद्गलानां पापे प्रयोजकत्वं च, जैनधर्म-प्रशंसादिसमीक्षा, जैन(२४) तीर्थंकर व्याख्या, जैनमते जम्बूद्वीपादिविस्तारः।

**त्रयोदशे समुल्लासे**—कृश्चीनमतसमीक्षा, लैव्यव्यवस्थापुस्तकम्, गणनापुस्तकम्, समुएलाख्यस्य द्वितीयं पुस्तकम्, ऐयूबाख्यस्य पुस्तकम्, उपदेशस्य पुस्तकम्, मत्तीरचितं इंजीलाख्यम्, मार्करचितं इंजीलाख्यम्, लकूरचितं इंजीलाख्यम्, योहनरचितसुसमाचारः, योहनप्रकाशितवाक्यम्।

**चतुदर्शे समुल्लासे**—यवनमतसमीक्षा

भाषा—वर्तमान समये अयं ग्रन्थः संस्कृत, हिन्दी अंग्रेजी इत्यादि विश्वस्य २५ भाषासु अनूदितम् अस्ति।

उल्लासाः—१४

*—सहायक सम्पादकः*
*दिल्ली संस्कृत अकादमी,*
*दिल्लीसर्वकारः*

# कृतघ्नेभ्यः साहाय्यं न दातव्यम्

**—डॉ० सौ० शारदा रमेश गाडगे**

कस्मिंश्चित् वने आसीत् दयाघनः नाम ऋषिः। सः अतीव दयालुः साहाय्यतत्परश्च आसीत्। एकदा सः ध्यानमग्नः आश्रमे उपविष्टः आसीत्। तदा कश्चित् भयभीतः मूषकः तस्य क्रोडम् आगतः। तम् अनुसरन् कश्चित् विशालकायः विडालश्च तत्र प्राप्तः। मूषकस्य भयकारणम् अवगत्य ऋषिणा तस्मै मूषकाय आश्रयः दत्तः विडालश्च लगुडप्रहारेण निष्कासितः। अनन्तरं सः मूषकः निर्भयः निश्चिन्तः तत्र एव न्यवसत्। ऋषिभयात् न कोऽपि मार्जारः तत्र आगन्तुं धैर्यम् अकरोत्।

शनैः शनैः मूषकस्य धैर्यं वृद्धिं गतम्। तेन स्वबान्धवाः सुहृदश्च तत्र आहूताः। आश्रमे मूषकाणां प्रतिदिनं वर्धमाना सङ्ख्या ऋषिणा अवलोकिता। मूषकाणाम् उपद्रवात् तस्य तपश्चर्यायां यज्ञकर्मणि च विघ्नाः समुद्भवन्। मूषकैः त्रस्तः सः अचिन्तयत्—'मया मूषकाय अभयं दत्त्वा न उचितं कृतम्। कृतघ्नः अयम्। मम दयार्द्रतायाः दुरुपयोगः कृतः अनेन नीचेन। अधमानां स्वभावः एव एष यद् ते उपकारं विस्मृत्य उपकर्तारमेव पीडयन्ति। न केनापि कृतघ्नेभ्यः आश्रयः प्रदातव्यः। इदानीम् अहमेव इतः अन्यत्र गमिष्यामि इति चिन्तयित्वा सः तस्मात् आश्रयात् निर्गतः। तस्मिन् ऋषौ अन्यत्र गते भयरहितैः मार्जारैः आश्रमं प्रविष्य सर्वे मूषकाः भक्षिताः।

*— १९बी, भांगेविहारः,*
*त्रिमूर्तिनगरम्, नागपुर-२२*
*महाराष्ट्रम्*

—:: ०:: —

# सत्यवादी बालकः

**—सुप्रिया कौशिकः**

मधुर एकः सत्यनिष्ठो धर्मपरायण ईश्वरभक्तः परोपकारी च बालकोऽस्ति। तस्य मात्रा सः शिक्षितो यत् कीदृशमपि संकटं भवेत्, कदापि असत्यभाषणं न करणीयम्। सत्यं साक्षात् तपोऽस्ति। अस्य साधनायां कष्टं सम्भवमस्ति, किन्तु निष्कर्षः सदैव सुखकर एव भवति। यतो हि उक्तम्—"असतो मा सद्गमय" (बृहदारण्यकः, १-३-२८) "हे प्रभो! मामसतो निवार्य सत्प्रति नयेः।"

सत्यवादियुधिष्ठिरस्य अरातयोऽपि तस्यादरमकुर्वन्। गान्धिना आजीवनं सत्यस्य पालनं कृतम्। तेन प्राड्विवाकेनापि कदापि असत्यस्याचरणं न कृतम्। न्यायाधीशा अपि तस्य वचनेषु विश्वासं कुर्वन्ति स्म।

एकदा कार्यवशात् मधुर एकाकी एव दूरदेशं गच्छति। समायाते निशाकाले तत्र स एकस्यां धर्मशालायामाश्रयं गृह्णाति। यात्रिरूपेण तत्र अष्टसंख्यका लुण्ठका अपि समागताः सन्ति। अर्द्धनिशायां तैर्भुशुण्डिकाबलेन सर्वेषां लुण्ठनं प्रारब्धम्। मधुरस्य वस्त्रादिकान् सम्यक् परीक्ष्यापि यदा तैः किमपि न लभ्यते, तदा तेषां नेता कथयति—"किं त्वं भिक्षुकोऽसि, यो विदेशेऽपि रिक्तहस्त आगतः?"

मधुरः— (निर्भीकभावेन) श्रीमन्! मम पार्श्वे पञ्चसहस्राणि रूप्यकाणि सन्ति।

लुण्ठकनेता— अस्य बालकस्य सम्यक् परीक्षणं कुरुथ।

(लुण्ठकाः पुनरपि तस्य वस्त्रादीनां सम्यक् परीक्षणं कुर्वन्ति। ते निष्फलप्रयत्ना भूत्वा निराशाः तिष्ठन्ति।)

लुण्ठकनेता— मूढ! त्वं मृत्योर्न बिभेषि? त्वया मिथ्याभाषणं कथं कृतम्?

मधुरः— मम मातुराज्ञा अस्ति, यत् साक्षात् मृत्युं दृष्ट्वापि कदापि असत्यं न वदेत्।

लुण्ठकनेता— (क्रुद्धो भूत्वा) किं त्वया स्वजीवने कदापि पञ्चसहस्ररूप्यकाणि द्रष्टानि? मूर्ख! तूष्णीं भव। अन्यथा ममाज्ञया त्वम् इदानीमेव स्मृतिशेषतां गमिष्यति। त्वं मया सहापि परिहासं करोषि।

मधुरः— मम जननी तानि रूप्यकाणि मम कञ्चुकस्य कण्ठप्रदेशे यत्नेन असीव्यत्। (स्थानसंकेतं कृत्वा) पश्यतु भवान्।

(लुण्ठकास्तस्य वस्त्रं विदार्य रूप्यकाणि गृह्णन्ति।)

लुण्ठकनेता— मूढ! त्वया स्वजनन्याः प्रयासो निष्फलः कथं कृतः? इदानीं धनविहीनः त्वं किं करिष्यसि?

मधुरः— मया स्वजनन्याः प्रयासो निष्फलः कथं कृतः? मया सत्यस्य अनुसरणं कृत्वा तस्या आज्ञायाः पालनं कृतम्। परिणामः कोऽपि भवेत् एतद् भाग्यायत्तमस्ति।

लुण्ठकनेता— तव सत्यमेव जेष्यति। तव निर्भीकतया सत्यवादितया चाहम् अतीव प्रभावितोऽस्मि। यदि तव मातेव ममापि माताभवत् अहं दुष्कर्मणि लिप्तो नाभवम्। यदा सर्वा जनन्यः तव मातेव भविष्यन्ति, तदा पृथिव्यामेव स्वर्गो भविष्यति। अहमस्मिन्नेव काले लुण्ठनकर्म त्यजामि। सर्वे जनाः स्व-स्वधनं गृह्णन्तु।

(स मधुराय तस्य धनं समर्पयति। तस्य पादौ च स्पृशति। सर्वे लुण्ठका मधुरस्य चरणौ स्पृष्ट्वा लुण्ठितं धनं च तत्रैव क्षिप्त्वा गच्छन्ति।)

*—एम०ए० (अंग्रेजी तथा संस्कृत) बी०एड०*
*अतिथि अध्यापिका (संस्कृत),*
*राजकीय उच्चतर माध्यमिक कन्या विद्यालयः,*
*पश्चिमी ज्योतिनगरम्, दिहली-११००३२*

—:: ०:: —

# कदापि लोभी मा भवतु भवान्!

—कृष्ण प्रसाद उपाध्यायः

एकदा रविवासरावकाशदिने कृष्णः स्व पित्रा सह आपणम् अगच्छत्। पिता आपणिकात् कृष्णाय बहूनि वस्तूनि क्रीणाति। यथा पुस्तकम्, पात्रम्, वाद्यम्, छत्रं, फेनकम्, दन्तफेनकम्, दन्तकूर्चिका आदीनि। एतेषां सर्वेषां वस्तूनाम् मूल्यम् अभवत् द्वादशोत्तरैकादशशतम्। पिता आपणिकाय पञ्चदशशतरूप्यकाणि यच्छति। आपणिकश्च त्रुटिवशात् तस्मै पञ्चाशीत्याधिक-चतुश्शतं प्रत्यावर्तयति। परं कृष्णस्य पिता आपणिकं तस्य त्रुटिं स्मारयति, एकशतं च प्रत्यावर्तयति।

स्व पितुः एतत् व्यवहारं दृष्ट्वा खिन्नः कृष्णः किञ्चित्कालानन्तरं पितरं तर्जयन् वदति—''किमर्थं भवान् शतरूप्यकाणां हानिः कृतवान्?'' इति। तदा पिता स्व पुत्रं सत्यनिष्ठायाः महत्त्वं प्रतिपादयति। कथयति च—''भो कृष्ण! तस्मिन् धने अस्माकम् अधिकारः नासीत्। अतः यस्मिन् धने वस्तौ वा अस्माकम् अधिकारः न भवति तत्र लोभः न करणीयः। भवान् अपि कदापि लोभी मा भवतु।''

*—(टी.जी.टी. संस्कृतम्)*
*रा०प्र०वि०विद्यालयः,*
*हरिनगरम्, नवदिहली-११००६४*

—:: ०:: —

# शठे शाठ्यम् समाचरेत्

**—प्रद्युम्नचन्द्रः**

एकः फलविक्रेता तथा एकः आपणिकः मित्रे आस्ताम्। फलविक्रेता आपणिकस्य आपणस्य समक्षे स्वहस्तशकट्यां फलानि विक्रीणाति स्म। एकदा यदा सः ग्रामं गच्छति स्म तदा सः स्व पित्तलस्य तुलां वाटकान् च आपणिकस्य पार्श्वे स्थापितवान्। किंचित् दिनानन्तरं यदा फलविक्रेता प्रत्यागच्छति स्म, सः स्वतुलां वाटकान् च प्रतिदातुं कथयति स्म। परन्तु मनसि तु छलम् आसीत्। सः अकथयत् यत्—''तुलां वाटकान् च तु मूषकाः अखादन्।'' कुटिलमनसः आपणिकस्य वचांसि श्रुत्वा फलविक्रेता क्रुद्धः भूत्वा अपि प्रसन्नवदनेन अकथयत् यत्—''मित्र! चिन्ता मा कुरु। एतत् तु तव दोषः नास्ति। मूषकाः तु किमपि क्षणमेव खादितुं समर्थाः भवन्ति।''

किञ्चित् दिनानन्तरम् एकस्मिन् दिवसे फलविक्रेता आपणिकम् अकथयत् यत्—''पश्य मित्र! अहं कानिचन वस्तूनि क्रयार्थं नगरं गच्छामि। यदि त्वम् अपि किञ्चित् याचसे तर्हि स्वपुत्रं मया सह प्रेषयतु। आवां श्वः आगामिष्यवः।'' आपणिकः अपि एकस्मिन् कर्गजे किञ्चित् वस्तूनां नामानि लिखित्वा स्व अष्टादशवर्षीयपुत्रं फलविक्रेता सह नगरं प्रेषितवान्। अग्रिमे दिवसे फलविक्रेता एकाकी एव प्रत्यागतवान्। आपणिकः फलविक्रेतारम् एकाकी दृष्ट्वा पृच्छति स्म यत् ''कथं त्वम् एकाकी आगमिष्यसि। मम पुत्रः कुत्र अस्ति।'' तदा फलविक्रेता शोकाकुलमुद्रायाम् अकथयत्—''किं वदानि मित्र! तव पुत्रं तु एकः श्येनः (बाज) उत्थापयित्वा अनयत्।'' ''कथं मिथ्या कथयसि? अष्टादशवर्षीयो मम युवानं बालकं कथं एकः श्येनः उत्थापयित्वा नेश्यति'' आपणिकः क्रोधेन कथयति स्म।

फलविक्रेता आपणिकस्य व्याकुलतां दृष्ट्वा मन्दं मन्दं मोदते। फलविक्रेतुः मन्दं मन्दं स्मितं दृष्ट्वा आपणिकः अतीव क्रोधेन अकथयत्—''कथय, कुत्र मम पुत्रः अन्यथा......।'' फलविक्रेता तस्य आपणिकस्य कथनं मध्ये एवं संख्य अकथयत्—''मित्र! यदा मूषकाः मम पित्तलस्य तुलां वाटकान् च खादितुं समर्था आसन् तदा एकः श्येनः तव युवाबालकं उड्डयितुं अपि समर्था आसन्। एतत् कथनं श्रुत्वा आपणिकं स्वपूर्वं कृतं छलं स्मृतिपथं आगतवान्। शीघ्रमेव सः अजानात् यत् मया सह प्रतिशोधरूपेण तेन एवं कृतं। छटिति एव सः स्व गृहात् फलविक्रेतुः पित्तलस्य तुलां वाटकान् च आनयत् तथा

च अकथयत्—''कृपया क्षम्यताम्। मम मनसि तव पित्तलस्य तुलां वाटकान् च प्रति लोभं आजागरितवान्। कृपया मम पुत्रं प्रत्यागच्छ।'' तदा एव आपणिकस्य पुत्र अपि तत्र आगतवान्। स्वपुत्रं दृष्ट्वा सः अतीव प्रसन्नः अभवत्।

इस कथा से यह शिक्षा मिलती है कि अपने पास जो है उसी में सन्तोष करना चाहिए कभी भी किसी की वस्तु का लालच नहीं करना चाहिए या बुरी नजर नहीं डालनी चाहिये। कहा भी गया है कि—''**मा गृधः कस्य स्विद्धनम्।**''

*— सहायकसम्पादकः*
*दिल्ली संस्कृत अकादमी,*
*दिल्लीसर्वकारः*

—:: ०:: —

# यात्रा—मङ्गलम् प्रति

**—डॉ० धर्मेन्द्रकुमार:**

भारतीय-अन्तरिक्ष-अनुसंधान-संगठन (इसरो) इत्यनेन अन्तरिक्ष-विज्ञान क्षेत्रे महत्त्व-पूर्णोपलब्धि अवाप्ता इति महतो हर्षस्य विषय: अस्माकं समेषां भारतीयानां कृते। मङ्गलग्रहेऽपि जीवनं वासयेदिति अस्माकं वैज्ञानिकानां दृढा धारणा वर्तते। चन्द्रयानं पश्चात् ''मङ्गलयानस्य'' यात्रा वर्तते। नवम्बरमासस्य पञ्चतारिका विशिष्टवर्तते। इण्डियन स्पेस रिसर्च ऑर्गनाइजेशन 'इसरो' इत्यनया विज्ञानसम्बन्धिसंस्थया इदं निर्णीतम्—यत् नवम्बरमासस्य पञ्चतारिकायां मध्याह्ने २ वादने ३६ मिनट समये यानमिदं अन्तरिक्षे गच्छेत् इति सर्वेषां कामना वर्तते। यानस्य यात्रा प्रारब्धा च सञ्जाता।

**( १ ) कीदृशी यात्रा वर्तते अस्य मंगलयानस्य—** श्रीहरिकोटात: के. सतीश धवन स्पेस सेंटर इत्यस्मात् स्थानात् ''पोलर सैटलाइट लॉञ्च वीइकल (पी.एस.एल.वी.) सी २५'' इत्यस्य साहाय्येन इदं मङ्गलयानम् अमोक्ष्यत वैज्ञानिकै:। अस्य वीइकल इत्यस्य मूल्यं ११० कोटिरूप्यकाणि सन्ति। भारं वर्तते १३५० किलो इति।

**( २ ) यात्रा कीदृशी भविष्यति**—मङ्गलयानस्यास्य यात्रा पृथिव्या: कक्षात: बहिर्निगत्य दशमासं यावत् अन्तरिक्षे भ्रमिष्यति। सितम्बर २०१४ पर्यन्तं यानमिदं मंगलकक्षासमीपं प्राप्स्यति। मंगलग्रहस्य कक्षा ३२७ गुणा ८०,००० किलोमीटर इत्यस्य वर्तते।

**( ३ ) किमर्थमिदं मंगलयानम्?—** भारतीया: वैज्ञानिका: जिज्ञासव: सन्ति अनेन मंगलयान-माध्यमेन तत्रत्यं वातावरणं कीदृशं चकास्ति तत्रापि जीवनस्य काऽपि सम्भावना वर्ततेऽथवा नैव। तत्रत्यं पर्यावरणं कीदृशम्, तत्र ''मीथैन गैस (वायु:) वर्तते अथवा न। इत्येतत् सर्वं विस्तरेण अध्ययनं कर्तुं वाञ्छन्ति अस्माकं वैज्ञानिका:।

**( ४ ) व्ययानुमानम्—** अस्य यानस्य कृते प्रायश: ४५० कोटिरूप्यकाणि व्ययीक्रियन्ते। 'इसरो' इत्यस्य अनेका: कर्मचारिण: वैज्ञानिकाश्च भारतस्य मंगलयानमिदं साफल्यं प्रदातुं प्रयासरता: सन्ति।

**( ५ ) अनेन मंगलयानेन के के लाभा: प्राप्स्यन्ते अस्माभि:—**

१. अन्तरिक्ष-विज्ञान-क्षेत्रे भारतस्य सामर्थ्यमस्ति इति सर्वै ज्ञास्यते।

२. अनुसंधानक्षेत्रे युवानः अपि प्रोत्साहिता भविष्यन्ति।

३. अन्यैः देशैः सह अपि संधयः भविष्यन्ति अनेन आर्थिका लाभा अपि लप्स्यन्तेऽस्माभिः।

४. यदि अनेन अन्तरिक्षविज्ञानेन साफल्यं लप्स्यते चेत् अन्येषु क्षेत्रेषु अपि अनेके शोधाः कर्तुम् शक्यन्तेऽस्माभिः।

५. यदि 'मंगलग्रहे' जीवनस्य प्रमाणानि उपलभ्यन्ते चेत् आगामी–समये भारतस्यापि भूस्वामित्वं मंगलग्रहस्य कृते भवितेति वक्तुं शक्यते भारतीया अपि तत्र वत्स्यन्ति। मंगलग्रहेऽपि निवासस्थानं भविष्यति।

६. यदि साफल्यं प्राप्स्यते चेत् एशियाईदेशेषु भारतस्य प्रामुख्यं प्राथम्यञ्च स्थानं अस्यां दिशि भवेतेति नास्ति संशीतिः।

**७. मंगलग्रहे गन्तुं एतावती जिज्ञासा किमर्थं चकास्ति?—**

• इदमपि अनुमीयते यत् मंगलग्रहे बहो कालात् पूर्वं जीवनम् आसीत्। इदमपि ज्ञायते यत् प्रायशः चतुरर्बुदवर्षपूर्वम् तत्रत्यं वातावरणं जीवनानुकूल्यम् आसीत्।

• इदमपि वैज्ञानिकैरनुमीयते यत् मंगलग्रहेण साकं यानि उल्कापिण्डानि संघटितानि (टकराना) तेषु एव जीवनस्य संभावना उद्भूता तानि अन्तरिक्षे प्रथितानि च। ततः पश्चात् प्रायशः ३.८ (अरब) अर्बुदवर्षपूर्वम् अस्यां पृथिव्यां जीवनस्य विकासः आरम्भः अभवत् इयम् वैज्ञानिकानां मान्यता।

• वैज्ञानिकानाम् इदमेवाभीष्टं यत् आगामीनि भविष्यति काले तत्रत्यं वातावरणं मानवानुकूलं अवश्यं भविष्यति।

**८. विशिष्टा संभावना ( प्लस प्वाईंट्स )—**

• चन्द्रमसं प्रति (देशस्य प्रथममिशन चन्द्रयान्) इति माध्यमेन तत्र जलस्य 'मॉलिक्यूल्' सम्प्राप्तेः पुष्टिरभवत्। पूर्णरूपेण स्वदेशीयैरुपकरणै एव अस्य यानस्य निर्मितिरभवत्।

स्वयमेव इदं यानम् स्वसंचालनश्च (मरम्मत) इत्यस्य क्षमता भविष्यति। मानवानां हस्तक्षेपः अल्प एव।

• सूर्यादेव ऊर्जा अनेन प्राप्स्यते यद्यपि तत्रास्य उपलब्धता स्वल्पा एव सेंसर माध्यमेन सम्पूर्णेऽपि मंगलग्रहे ''मीथेन्'' इत्यस्य अन्वेषणं भविष्यति येन च तत्र जीवनानु-कूल्यमन्विष्यते।

**९. मंगलयानयात्राकालावधिः—**

• २०१३ नवम्बरमासस्य पञ्चतारिकायां दिवसे २.३८ वादने श्रीहरिकोटातः मंगलयानस्य प्रक्षेपणम् सञ्जातम्।

• चत्त्वारिंशत् मिनटपर्यन्तं कालमपेक्ष्यते यानस्य पृथिव्याः कक्षायाम् सैटलाईट् विमोक्तुम्।

• २० दिवसप्रभृति २५ दिवसपर्यन्तं पृथिवीं परितः भ्रमिष्यति (सैटलाइट)।

• दिसम्बरमासस्य प्रथमदिनाङ्कं मङ्गलग्रहार्थं स्वयात्रा प्रारप्स्यते (सैटलाइट)।

• २४ सितम्बर २०१४ पर्यन्तं मंगलस्य कक्षां प्राप्स्यति सैटलाइट (पी.टी.आई, आईएएनएन) लब्धा। इति माध्यमेन एषा सूचना भारतीय-अन्तरिक्ष-अनुसंधान-संगठन 'इसरो' इत्यस्य अध्यक्षमहोदयेन श्रीमता के० राधाकृष्णन् महोदयेन युक्तमेवोक्तम् अवसरेऽस्मिन्—"देश के पहले मंगल अभियान का मकसद इस ग्रह पर सार्थक शोध है, जिससे वहाँ जीवन बसाने की सम्भावना बन सके आज से २० से ३० साल बाद।"

एवमेव प्रसिद्धेन वैज्ञानिकेन प्रो० यशपालमहोदयेन कस्मिंश्चित् साक्षात्कारे यथोक्तम्—केनचित् साक्षात्कारकर्त्रा पृष्टम्—भारतवर्षे इदानीम् निर्धनता प्राचुर्येण दरीदृश्यते। स्वतन्त्रतायाः ६६ वर्षेषु व्यतीतेषु अपि सामान्यजनानां कृते स्वास्थ्य-शिक्षा-आजीविका-इत्यादिषु क्षेत्रेषु सौविध्यं नैवोपलभ्यते। अस्मिन् समये मंगलयानमधिकृत्य एतावन्ति ४५० कोटिरूप्यकाणि व्ययीक्रियन्ते। इदं युक्तमस्ति किम्? प्रो० यशपालमहोदयेन भणितम्—

यह हमारे स्पेस साईंस को आगे बढ़ाने की मुहिम है। सोलर सिस्टम में जिस तरह से बदलाव आ रहे हैं और दुनिया की जलवायु जिस तरह से बदल रही है, उसे देखते हुए क्या पता आने वाले समय में पृथिवी पर मानव का रहना मुश्किल हो जाए। ऐसे में दूसरे ग्रहों पर जीवन के सूर्य तलाशने को गलत नहीं कहा जा सकता।

मंगलयानं प्रति गन्तुं अमेरिका-रूस-चीन-जापान-देशस्य वैज्ञानिकाः समुत्सुकाः सन्ति। भारतवर्षीया वैज्ञानिका अपि अस्यां दिशि प्रयासरताः शोधरताश्च सन्ति इति महान् हर्षप्रकर्षस्य विषयोऽस्ति अस्माकं समेषां भारतीयानां कृते। वयं कामयामहे मंगलयानमिदं साफल्यं प्राप्नुयात्। येन च तस्मिन् ग्रहेऽपि वयं उषितुं शक्नुयाम। शीघ्रमेव अस्माभिरपि तत्र गन्तुम् बुकिंग (Booking) अवश्यं करणीयम् इति सर्वेषां वैज्ञानिकानां कृते पौनःपुन्येन भूयांसि वर्धापनानि संस्कृतजगतः माध्यमेन। अस्माकं ऋषिभि वेदेषु पूर्वमेव प्रार्थितम्—

**ओ३म् हि॒र॒ण्य॒ग॒र्भः सम॑वर्त्त॒ताग्रे॑, भू॒तस्य॑ जा॒तः पति॒रेक॑-आसीत्।**
**स दा॑धार पृथि॒वीं द्यामु॒तेमां, कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥** —यजु० १३।४

अस्य मंत्रस्य आंग्लभाषायाम् अर्थः—प्रदीयते येन च पूर्वोक्तस्य अर्थस्यैव संगतिः यथायथं अन्वेष्टव्या—

God who possesses all the luminous worlds within himself and exists from the very eternity, is the only one menifest Lord of the created objects. He is supporting this earth and the heaven. To that All-blissful Divinity, we offer our humble worship.

*— सचिवः*
*दिल्ली संस्कृत अकादमी,*
*दिल्लीसर्वकारः*

**—:: ०:: —**

# मानवजीवने अध्ययनस्योपादेयता

—डॉ० रेनू के० शर्मा

मानवजीवने ज्ञानस्य महती आवश्यकता महत्ता च विद्यते। ज्ञानेन विना मानवजीवनं तु पशुवत् एव भवति। ज्ञानमपि तु अध्ययनेन सम्भवति। प्रदीपवत् ज्ञानं मानवजीवने अज्ञानान्धकारं दूरीकृत्य प्रकाशं करोति। दुर्गुणान् निवारणाय मार्गः तु विद्यार्जनमेव। विद्याऽपि चेत् अल्पीयसी भवेत् तर्हि तद्विरुद्धम् अहंभावम् उत्पादयति। जनाः अधीतं स्वल्पमेव ज्ञानं सर्वं इति मन्यमानः ज्येष्ठानाम् अपि अनादरं कुर्वन्ति। उक्तमेव पूर्णो कुम्भः न करोति शब्दम् अपितु अर्धः कुम्भमेव शब्दं करोति।

यतो हि यः अज्ञः तस्य कृते बोधनं सुलभम् अस्ति, समधीतस्य विशेषज्ञस्य बोधनं तु ततोऽपि सुखतरम् परन्तु यः कोऽपि तिलमात्रमेव ज्ञानं प्राप्य दुर्विनीतं तं बोधयितुं ब्रह्मा अपि न शक्नोति—

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।**
**ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति॥**[1]

वस्तुतः अल्पज्ञानं तु विपज्जनकं भवति। यतः अहंकार एव ज्ञानार्जने अवरोधः भवति अतः अहंभावं परित्यज्य विनयशीलाः भवेम। बुधजनसकाशात् सहवासात् एव ज्ञानस्य वृहिः भवति। अस्तु तेषां अगाधं ज्ञानसम्पदं अवलोक्य स्व ज्ञानस्य मूल्याकनं करणीयः। ज्ञानपरीक्षार्थम् उक्तं नीतिशतके—

**यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं,**
**तदा सर्वज्ञोऽस्मीत्यभवदलिप्तं मम मनः।**
**यदा किञ्चिद् किञ्चिद् बुधजनसकाशादवगतं,**
**तदा मूर्खोऽस्मीति ज्वर इव मे मदो व्यपगतः॥**[2]

अर्थात् यदा अहं किञ्चिदेव जानामि स्म तदा सर्वज्ञः इति मदेन मम मनः लिप्तः आसीत् किन्तु बुधजनसकाशात् स्व ज्ञानस्य अल्पतां ज्ञात्वा अहं मूर्खो अस्मि इति ज्ञानोदयः जातः। यथा चन्दनस्य लेपनेन ज्वरः तथैव मम मदः अपि व्यपगतः। महाकविकालिदासेन अपि विदुषां विषये अभिज्ञानशाकुन्तले उक्तम्—

**आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥**[3]

अभिज्ञानशाकुन्तले सूत्रधारस्य माध्यमेन उचितमेव सूच्यते यत् विदुषां सन्तोषपर्यन्तं अभिनयकौशलं समीचीनं न मन्ये यतः निपुणानाम् अपि चेतः स्वविषये अविश्वस्तं भवति।

अध्यनेन बिना मानवजीवनं तु पशुरूपेण एव भवति। श्रूयते च मानवः तु साहित्यसंगीत कलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः। विद्या मनुष्यस्य भूषणमिव भवति। सा तु गुप्तधनमिव सदैव मनुजेन सह वसति, यशः प्रददाति, नित्यप्रति सा वर्धयति एव—

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**
**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनो विदेशगमने विद्या परा देवता**
**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥**[४]

ये जीवने ज्ञानार्जनाय संलग्राः सन्ति, तेषां यशः तु प्रतिदिनं वर्धते। न केवलं अस्मिन् जीवने अपितु मरणोपरान्तमेव जनानां मध्ये तेषां कीर्तिं रूपेण अजर-अमर भूत्वा भूतले एव तिष्ठन्ति—

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।**
**नास्ति येषां यशः काये जरामरणजं भयं॥**[५]

जगति सर्वदा ज्ञान प्रशंसा अज्ञान निन्दा च भवति। ज्ञानमपि अहंकारशून्यः भवेत्। अध्येयं तु सर्वदा हिमालयपर्वतः इव महत् सागरः इव गम्भीरः भवेत् यतः तत्पश्चात् विनयः स्वयमेव प्राप्यते। उक्तमेव 'विद्या ददाति विनयं' विद्या वा ज्ञानाधिक्यं तु न केवलं विनयं अपितु अनेकान् सद्गुणान् उत्पद्यते। वयम् अस्मिन् मानवजीवने एव विविधशास्त्राणां अध्ययनं कर्तुं शक्नुमः। अस्तु, दुर्गुणान् विहाय ज्ञानप्राप्तये प्रयत्नं करणीयः। बाल्यकालादेव जीवनपर्यन्तं अध्ययनं आवश्यकमस्ति।

**सन्दर्भ-ग्रन्थ-सूची—**


१. नीतिशतकम्, श्लोक संख्या-२    २. वही, श्लोक संख्या-७

३. महाकवि कालिदासप्रणीतं अभिज्ञानशाकुन्तलम्, १।२

४. नीतिशतकम्, श्लोक संख्या-१६    ५. वही, श्लोक संख्या-१६


—:: o:: —

# गीतामृतम्

—दिनेशचन्द्रशर्मा

**देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।**
**तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥**

जैसे जीवात्मा की इस देह में बालकपन, जवानी और वृद्धावस्था होती है, वैसे ही अन्य शरीर की प्राप्ति होती है, उस विषय में धीर पुरुष मोहित नहीं होता।

Just as bayhood, youth and old age are attributed to the soul through this body, even so it attains another body. The wise man does not got deluded about this.

**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥**

क्योंकि हे पुरुषश्रेष्ठ! दुःख-सुख को समान समझनेवाले जिस धीर पुरुष को ये इन्द्रिय और विषयों के संयोग व्याकुल नहीं करते, वह मोक्ष के योग्य होता है।

The wise man to whom pain and pleasure are alike, and who is not perturbed by these contacts, becomes eligible for immortality.

**य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।**
**उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥**

जो इस आत्मा को मारनेवाला समझता है तथा जो इसको मरा मानता है, वे दोनों ही नहीं जानते, क्योंकि यह आत्मा वास्तव में न तो किसी को मारता है और न किसी के द्वारा मारा जाता है।

Both of them are ignorant, he who knows the soul to be capable of killing and he who takes it as killed, for verily the soul niether kills, nor is killed.

**न जायते म्रियते वा कदाचिन्नायं**
**भूत्वा भविता वा न भूयः।**

जैसे मनुष्य पुराने वस्त्रों को त्यागकर दूसरे नये वस्त्रों को ग्रहण करता है, वैसे ही

जीवात्मा पुराने शरीरों को त्यागकर दूसरे नये शरीरों को प्राप्त होता है।

As a man shedding worn-out garments, takes other new ones, likewise the embodied soul, casting of worn-out bodies, enters into others which are new.

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥**

इस आत्मा को शस्त्र नहीं काट सकते, इसको आग नहीं जला सकती, इसको जल नहीं गला सकता और वायु नहीं सुखा सकता।

Weapons cannot cut it nor can fire burn it, water cannot wet it nor can wind dry it.

*— सहायक प्रचार-प्रसार अधिकारी,*
*दिल्ली संस्कृत अकादमी,*
*दिल्ली सर्वकारः*

—:: ०:: —

# अथर्ववेदे शिक्षादर्शनम्

**( गुरुशिष्यसंदर्भे )**

**—डॉ० धर्मेन्द्रकुमारः**

सर्वप्रथमं विविच्यते यत् का नाम शिक्षा। शिक्षाशब्दोऽयम् शिक्ष विद्योपादाने इत्यस्माद्धातोः अकार प्रत्यये[1] कृते सति ततश्च स्त्रीत्ववाच्ये टापि[2] प्रत्यये कृते सति निष्पद्यते। सा सम्पूर्णा अपि क्रिया, अथवा सम्पूर्णोऽपि व्यापारः येन विद्याग्रहणं भवेत्, शिक्षणं वा भवेत् पठन-पाठने सहायको भवति स व्यापारः एव शिक्षापदेन व्यपदिश्यते।

महर्षिदयानन्देन सत्यार्थप्रकाशस्य स्वमन्तव्यामन्तव्यप्रकाशे शिक्षापरिभाषा एवम्प्रकारेण प्रतिपादिताऽस्ति—यया विद्या सभ्यता धर्मात्मता जितेन्द्रियता इत्यादीनां सद्गुणानां संवर्धनं भवेत् अथ च अविद्याऽस्मितारागद्वेषाभिनिवेशाख्यानि दुःखानि अपगतानि भवेयुः, सा एव शिक्षा भवितुमर्हति। प्राचीनकाले गुरुशिष्ययोर्मध्ये विद्यापठनपाठन समये अस्य मंत्रस्य उच्चारणं उभावपि गुरुशिष्यौ कुरुतः स्म—

**सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।**
**तेजस्विनावधीतमस्तु मा विद्विषावहै[3] ॥**

मंत्रस्य नौ इति कथनेन उभयोरपि गुरुशिष्ययोर्ज्ञानं भवति। प्राचीनकालशिक्षायाः पंच उद्देश्यानि अत्र ध्वनितानि भवन्ति—

सहनाववतु इति कथनेन ब्रह्मचर्यस्य ज्ञानं प्रतीयते। यतो हि ब्रह्मचर्यस्य सम्यग् पालनेनैव शरीर-मन-आत्मा-बुद्ध्यादीनां सम्यग् विकासो भवितुमर्हति। 'सहनौ भुनक्तु' इत्यनेन आजीविकोपार्जनं द्वावपि मिलित्वा करिष्यतः इति ध्वन्यते। 'सहवीर्यं करवावहै' इत्युक्ते सति सर्वेऽपि राष्ट्रवासिनो वीर्यवतः तेजस्विनः यशस्विनः वर्चस्विनो भवेयुरिति ज्ञायते। छात्राः निर्बलाः हीनाः निस्तेजाः नैव भवेयुरिति कामयते ऋषिः। 'तेजस्विनाव-धीतमस्तु' इत्यनेन ध्वन्यते ज्ञायते प्रतीयते यत् अध्ययनम्-अध्यापनम् सम्मानजनकं स्यात्। स्वपूर्ववर्तिनाम् आचार्याणां ज्येष्ठानां कृतेऽपि आनुकूल्यं स्यात्। 'मा विद्विषावहै' परस्परं सौहार्दम् स्यात् द्वेषभावना न वा स्यात्। अयमेव वैदिकी शिक्षायाः आदर्श आसीत्। साम्प्रतिके कालेऽपि शिक्षाविद्भिः तथैव व्यवहर्तव्यम्।

अथर्ववेदस्य एकादशकाण्डस्य पंचमसूक्तस्य षड्विंशति मन्त्राः सन्ति। येषु मन्त्रेषु तात्कालिकी वैदिकी-शिक्षायाः ज्ञानं भवति—तस्य तृतीये मन्त्रे ऋषिणा उद्घोषितमस्ति—

आ॒चा॒र्य॑ उ॒प॒नय॑मानो ब्रह्मचा॒रिणं॑ कृणु॒ते गर्भ॑म॒न्तः।
तं रात्री॑स्ति॒स्र उ॒दरे॑ बिभर्ति॒ तं जा॒तं द्रष्टु॑मभि॒संय॑न्ति दे॒वाः॥[४]

मंत्रेस्मिन् सर्वप्रथम् आचार्य शब्दस्य पाठो वर्तते। यास्काचार्येण आचार्यशब्दस्य व्युत्पत्तिः प्रतिपादिताऽस्ति आचार्यः कस्मात्? आचारं सदाचारं गुणाचारं ग्राहयतीति आचिनोति बुद्धिम् आचिनोति अर्थनिति शास्त्रस्य अर्थान् शिष्येषु समन्तान्निवेशयति बुद्धिं चापि संवर्धयति वा[५]। आचार्यः आचारं स्वशिष्यान् शिक्षयति बुद्धेर्विकासः शिष्यान् अनुशासने प्रतिबध्नाति। इतीमानि त्रीणि कर्तव्यानि आचार्यस्य प्रतिपादितानि सन्ति। द्वितीयः शब्दोऽस्ति-ब्रह्मचारिणम् ब्रह्मणि चरितुं शीलमस्यास्तीति ब्रह्मचारी[६]। अनेन ज्ञायते यत् अन्तेवासिनां विविधो विकासो भवेत् शारीरिकः, मानसिकः आध्यात्मिकश्च।

तृतीयः शब्दोऽस्ति 'उपनयमानो स्वगुरुकुले ब्रह्मचारिणं दीक्षितं करोति स्म।'' आचार्य करणमाचार्यक्रिया। माणवकमीदृशेन विधिनात्मसमीपं प्रापयति[७]।

चतुर्थः शब्दोऽस्ति कृणुते गर्भमन्तः आचार्यः अन्तेवासिनं गर्भमन्तः कृणुते। यथा माता स्वगर्भं धारयति दशमासं यावत्। यदा च शिशुः सर्वाङ्गपरिपूर्णो भवति तदा तस्य जन्म भवति एवमेव आचार्यः स्वगुरुकुलरूपोदरे तम् अन्तेवासिनं तावत् पर्यन्तं धारयति यावत् पर्यन्तं तस्य परिपूर्ण विकासो नैव भवति। तिस्रः रात्रि उदरे बिभर्ति। ताः तिस्रः रात्रयः काः सन्ति—यावत् पर्यन्तम् तस्य अन्तेवासिनः बौद्धिक-विकासः, मानसिक-विकासः, शारीरिक-विकासः, परिपूर्णो न भवति तावत् पर्यन्तं स आचार्यकुलं धारयति। तं जातम् यदा स्नातको भवति तदैव तस्य द्वितीयो जन्मः भवति। तदैव स द्विज भवितुमर्हति। द्विज इति पदेन ज्ञायते यत् तस्य द्विधा जन्म भवति एकः मातृकुक्षितः अपरश्च आचार्यस्य उदरतः। उत्तरकालिकः जन्म एव श्रेष्ठ उच्यते तदैव द्विजत्वमाप्नोति। यदा पर्यन्तं आचार्येण तस्य उपनयनं न कृतम् तदा पर्यन्तं स मानवः न आसीत् अपितु 'माणवक' आसीत् अतएव काशिकाकृता माणवकमुपनयते इति पठितमस्ति। कः माणवकः भवति इति जिज्ञासायाम् कारिकैषा पठिता—

अपत्ये कुत्सिते मूढ़े मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्द्धन्यस्तेन सिद्ध्यति माणवः[८]॥

कुत्सितः मूढ़पुत्रः माणव इति उच्यते।

आचार्य गर्भवसात् यदा तस्य द्विधा जन्म भवति तदैव स मानव भवति। ऋग्वेदे तस्य कृते उपदिष्टम् अस्ति—'मनुर्भव'[९] किञ्च उपनयनसंस्कारसमये ब्रह्मचारिणं स्वशिष्यम्

गुरुकुलशिक्षा-संस्थायां प्रवेशसमये आचार्य इमं मन्त्रम् पठति स्म।

**मम व्रते ते हृदयं दधामि। मम चित्तमनु चितं ते अस्तु।**
**मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्॥**

द्रष्टुमभिसंयन्ति देवाः—देवाः समाजस्य देवविभूषिता जनाः तं स्नातकं द्रष्टुमायान्ति स्म। आचार्येण स्वशिष्यस्य निर्माणं केन प्रकारेण कृतम् इति द्रष्टुं विद्वान्सः समागच्छन्ति स्म। अनेन मन्त्रेण तात्कालिकी वैदिकी शिक्षा कीदृशी आसीत्। तस्या किं स्वरूपम् आसीत्। उद्देश्यं किम् आसीत्। इत्येतत् सर्वं विवेचितं भवति। स द्विजो भूत्वाऽपि आचार्य पुनरपि तं प्रति आदिशति स्म—''यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि।''

अद्यत्वे या शिक्षापद्धति प्रचलिता दृश्यते। तस्यां गुरुशिष्ययोः सम्बन्धः कीदृशः वर्तते इत्येतत् सर्वै ज्ञायत एव।

वैदिकशिक्षायां अन्तेवासी महत्त्वपूर्णं स्थानं लभते स्म। अग्नौ तिस्रः समिधः जुहोति स्म। का च ताः तिस्रः समिधः इति जिज्ञासायाम् मंत्रेस्मिन् स्फुटं प्रतिपादितमस्ति—

**इयं समित्पृथिवी द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति।**
**ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्ति॥**[१०]

स ब्रह्मचारी श्रमेण सर्वान् लोकान् पूरयितुमिच्छति पृथिवीस्थं यत् सर्वं ज्ञानम्, अन्तरिक्षस्थज्ञानम् द्युलोकस्य यज्ज्ञानम् तत् सर्वमवाप्नोति।

गुरुशिष्ययोर्मध्ये श्रवण-मनन-निदिध्यासनेनोपगतया विद्यया संसारस्य पृथिवी-सूर्यादीनां समस्तानां पदार्थानां तत्त्वज्ञानं कृत्वा तस्य उपयोगः सम्यक्तया स चिकीर्षति। अतएव ब्रह्मचर्य सूक्ते पठितमस्ति—

**आचार्य॒स्ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथिवीं दिवं च।**
**ते रक्षति तपसा ब्रह्मचारी तस्मिन्देवाः संमनसो भवन्ति॥**[११]

आचार्यकुलं नैव तच्छक्नोति यत्र केवलं शिक्षायाः उद्देश्यं रूप्यकाणाम् अर्जनमेव स्यात्। प्राचीनकाले केवलं छात्राणां चरित्रनिर्माणं कथं भवेत् इत्येव सर्वे आचार्याः कामयन्ते स्म। आचार्याः कीदृशा भवेयु इति विषये महर्षिणा दयानन्देन उल्लिखितमस्ति—ये मनुष्या इह निन्दास्तुतिहानि-लाभादीन् तितिक्षवः पुरुषार्थिनः सर्वे सह मैत्रीमाचरन्त आप्ताः स्युस्ते सर्वैः सेवनीया सत्कर्तव्याश्च त एव सर्वेषामध्यापका उपदेष्टारश्च स्युः[१२]। छात्रान् प्रति महर्षिवर्या लिखन्ति—धीमन्तो विद्यार्थिनः। ये युष्मभ्यं विद्यां प्रयच्छेयुस्तान्निष्कपटत्वेन

प्रीत्या सेवध्वम्। जितेन्द्रिया भूत्वा यथार्थ विद्यां प्राप्नुत[१३]। छात्रा अपि सहनशीला चन्द्रवत् शान्तचित्ता: भवेयु:—ये विद्यामिच्छेयुस्ते सर्वेषां मर्मच्छिदो वाच: सहन्ताम्। चन्द्रवच्छात्रा भूत्वा विद्याविनयौ गृह्णन्तु। शिष्यै: अन्तेवासिभि: प्रार्थ्यन्ते स्वगुरव:—हे आचार्यप्रवर! वाचस्पते! भूयोभूय: आगत्य देवेन मनसा अस्मान् तत्र भवन्त: पाठयन्तु। 'निरमय' पाठनसमये अस्माकं छात्राणां मनांसि तत्रैव मोमुद्येरन्। यदधीतम् मय्येवास्तु तत् श्रुतम् भवेत्। अतएव अथर्ववेदे प्रार्थ्यते—

**पुनरेहिं वाचस्पते देवेन मनसा सह।**
**वसोष्पते नि रमय मय्येवास्तु मयि श्रुतम्॥[१४]**

यज्ज्ञानम् अधिगम्यते अस्माभि: तद्वत् व्यवह्रियते अस्माभि:। सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि[१५] एवम्प्रकारेण निष्कर्षरूपेण वक्तुं शक्यते यत् वैदिकीपरम्परायां शिक्षाकाले आचार्यस्य महत्त्वपूर्ण स्थानं जायते स्म। अन्तेवासिनामपि महत्त्वपूर्णं स्थानमासीत् इत्यत्र नास्ति काऽपि संशीति:। उभयोर्मध्ये योजकरूपेण विद्या आसीत्। ततश्च प्रवचनम् व्याख्यानम् आसीत् अतएव उपनिषदि शिक्षामाहात्म्यम् प्रतिपादितम् आचार्य: पूर्वरूपम् अन्तेवासी उत्तररूपम् विद्या संधि, प्रवचनम्-सन्धानम् मंत्रमिदं महत्त्वपूर्णं स्थानं भजते शिक्षा प्रसङ्गे। वैदिकशिक्षापद्धत्या: इमानि उद्देश्यानि आसन् बुद्धेर्विकास: सुबुद्धिं विना शिक्षा नैव अधिगन्तुं शक्यते[१६]। शिक्षामाध्यमेन अज्ञानं तिरोहितं भवति[१७]। ज्ञानप्रदानम् जीवने यत् कौशलं तस्य आविष्करणम् स्यात्[१८]। चिन्तनक्षमतायाम् वृद्धि: स्यात् दैवीगुणानां विकास: भवेत्। आसुरी प्रवृत्तीनां निरोध: भवेत्[१९]। न केवलं वैयक्तिक-विकास एव भवेत् अपितु विश्वजनीना शिक्षा भवेत्[२०]। शुद्धाचरणं सुचरित्रनिर्माणं स्यात् बालकानाम्[२१] यजुर्वेदे शिक्षोद्देश्यं प्रतिपादितम्—सा विद्या या विमुक्तये[२२]। ज्ञानकर्मणो: समन्वय: जीवने स्यात्[२३]। श्रेयप्रेयश्च उभयो: समन्वय: करणीय:[२४]। अध्यात्म-भौतिकवादयो: समन्वय: आवश्यक: अनुशासनं समर्पण भावना च इत्यनयो: विकास: जीवने अत्यावश्यक: अस्ति[२५]। इमानि उद्देश्यानि सार्वकालिकानि सार्वदेशिकानि च सन्ति। मानवीय-जीवने मूल्यानां विकास: एव शिक्षाया: उद्देश्यं भवितुमर्हति। आधुनिका ये शिक्षाशास्त्रिण: सन्ति तै सर्वै: संमील्य एतद् विषयकं चिन्तनम् अवश्यं करणीयम्। येन च प्राचीन-आधुनिक शिक्षयोर्मध्ये समन्वय: स्यात्। तदैवास्य राष्ट्रस्य कल्याणं भवितुं शक्यम् इत्यत्र नाऽस्ति संदेहावसर:।

**सन्दर्भ-ग्रन्थ-सूची—**


१. गुरोश्च हलः अष्टा० ३.३.१०३

२. अजाद्यतष्टाप अ० ४.१.४

३. तैत्तिरीयोपनिषद् २.१.१

४. अथर्व० ११.५.३

५. निरुक्ते १.१.१

६. अष्टाध्यायी ३.२

७. अष्टा० १.३.३९ काशिकावृत्तौ

८. अष्टा० ४.१.१६१ काशिकावृत्तौ

९. ऋग्० १०.५३.६

१०. अथर्ववेद ११.५.४

११. अथर्व० ११.५.८

१२. यजुर्वेद ३४.१८ इति मंत्रस्य भावार्थः।

१३. ऋग्वेद ४.३४.३ इति मंत्रस्य भावार्थः।

१४. अथर्व० १.१.२

१५. अथर्व० १.१.४

१६. अथर्व० ७.१६.१

१७. ऋग्वेद १०.१८२.३

१८. ऋग्वेद १.१८२.३

१९. ऋग्वेद १.१८२.३

२०. यजुर्वेद १७.७४

२१. यजुर्वेद १.६

२२. यजुर्वेद ४०.१४

२३. यजुर्वेद ४०.१४

२४. यजुर्वेद ४०.१४

२५. अथर्व० १९.४१.१



*—सचिवः*

*दिल्ली संस्कृत अकादमी,*

*दिल्लीसर्वकारः*


—:: o:: —

# वैशेषिक-दर्शनम्

—डॉ० वेदनिधि

अयि भो छात्राः अद्य वयं वैशेषिक-दर्शनस्य अध्ययनं करिष्यामः। अस्य दर्शनस्य प्रवर्त्तकः महर्षिकणादः वर्त्तते। इदं दर्शनं सप्तपदार्थानां निरूपणं करोति। तद्यथा—(१) द्रव्यम्, (२) गुणः, (३) कर्म, (४) सामान्यम्, (५) विशेषः, (६) समवायः, (७) अभावः इति।

इदानीं एतेषां विवेचनं संक्षेपेण करिष्यामः।

**द्रव्यम्—**

द्रव्याणि नव सन्ति। (१) पृथ्वी, (२) जलम्, (३) अग्निः, (४) वायुः, (५) आकाशम्, (६) कालः, (७) दिक्, (८) आत्मा, (९) मनः इति।

**गुणाः—**

गुणानां संख्या चतुर्विंशतिः। रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण, पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-स्नेह-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म-संस्कारः इति।

**कर्म—**

कर्माणि पञ्च भवन्ति—

(१) उत्क्षेपणम्—(उपरि क्षिपणम्)

(२) अवक्षेपणम्—(अधः क्षिपणम्)

(३) आकुञ्चनम्—(संकुचनम्)

(४) प्रसारणम्—(प्रसरणम्)

(५) गमनम्—(चलनादि विविधाः क्रियाः)

**सामान्यम्—**

सर्वेषु मनुष्येषु मनुष्यत्वम् भवति एवमेव सर्वेषु अश्वेषु अश्वत्वं भवति सा जातिरेव सामान्यमिति कथ्यते।

**विशेषः—**

पृथिव्याः, जलस्य अग्नेः वा अनेके परमाणवः भवन्ति। ते आकृत्या, गुणदृष्ट्या वा

सदृशाः समानरूपाः वा भवन्ति, अतः तेषां पार्थक्यज्ञानं कथं भवेत्? विशेषेणैव तेसां पार्थक्यं ज्ञायते। अतः विशेषोऽपि पदार्थः अस्ति।

**समवायः—**

सम्बन्धः द्विविधः संयोगः समवायश्च। अनित्यः तात्कालिकश्च सम्बन्धः संयोगः भवति। यथा द्वयोः हस्तयोः मिलनम्। नित्य-सम्बन्धः समवायः उच्यते। यथा पटस्य पटरूपस्य (द्रव्यगुणयोः) मनुष्यस्य मनुष्यत्वस्य (जातिद्रव्ययोः) यः सम्बन्धः स नित्यः अत एव समवाय सम्बन्धः।

**अभावः—**

कस्यापि वस्तुनः अविद्यमानत्वं अभावः इति उच्यते। स च अभावः चतुर्विधः—

(१) प्रागभावः—यथा उत्पत्तेः प्राग् घटस्य अभावः।

(२) प्रध्वंसाभावः—यथा घटस्य नष्टानन्तरं तस्य अभावः।

(३) अन्योन्याभावः—यथा घटः पटः नास्ति पटः घटः नास्ति घटे पटस्य पटे घटस्य अभावः।

(४) अत्यन्ताभावः—यथा वायौ रूपस्य अभावः।

*— तदर्थ प्रवक्ता संस्कृतविभागः,*
*विवेकानन्द महाविद्यालयः,*
*दिल्ली–९५*

**—:: ०:: —**

# ''स्वाध्यायान्मा प्रमदः'' सत्यं वद, धर्मं चर इत्यादिनां वाक्यानां विवेचनम्

**—डॉ० धर्मेन्द्रकुमारः**

अयि भो छात्राः! भवन्तः सर्वेऽपि जानन्ति एव अनया संस्कृतचन्द्रिका-पत्रिकया भवतां ज्ञानवर्धनम् अवश्यं भविता इति वयं सर्वेऽपि कामयामहे। भवन्तः सर्वेऽपि तेजस्विनः वर्चस्विनः धीमन्तः श्रीमन्तः बुद्धिमन्तः मेधाविनो भवितुं वाच्छन्तिः। तर्हि किं किं कर्तव्यम्। इत्येतत् सर्वं संस्कृतचन्द्रिकामाध्यमेन भवद्भिः ज्ञातं स्यात्। छात्राणां दिनचर्या कथं स्यात्? कथमस्माभिः परिवारे-समाजे-राष्ट्रे वा परस्परं व्यवहरणीयम्। अस्माकं ये भ्रातरो भगिन्यश्च सन्ति तैस्सार्धम् अस्माकं व्यवहारः कीदृशो भवेदिति सर्वदा ध्यातव्यम्।

प्रातःकाले शीघ्रम् उत्थाय पितरौ वंदनीयौ। ये ज्येष्ठाः श्रेष्ठाः सन्ति तेषाम् आशीर्वचोभिः वयं धन्या भवामः। युष्माभिः एकः श्लोकः कंठीकृतो भवेत्—

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**

**चत्त्वारि तस्य वर्धन्त आयुर्विद्यायशोवलम्।**

अतः ज्येष्ठानां ज्ञानवृद्धानां वयोवृद्धानां सम्मानम् अवश्यं करणीयम्।

ते यत्किमपि वाञ्छन्ति अस्माकं हिताय एव अहर्निशं चिन्तयन्ति। एतदपि श्रुतं भवेत् भवद्भिः—''सत्यम् वद'' Always speak the truth 'धर्मं चर' Follow the path of Dharma ''स्वाध्यायान्मा प्रमदः'' एतेषां त्रयाणाम् आचरणेन अस्माकं जीवनम् शुद्धं पूतं महोच्चं भविष्यति। सदा सत्यमेव वदनीयम्। असत्य-भाषणं न कदापि वक्तव्यम्। भवन्तः जानन्ति एव—'**सत्यमेव जयते नानृतम्**' अन्ते सत्यस्य एव विजयो भवति। अनृतभाषणेन स्वात्मानं वयं वञ्चयामः। धर्मं चर इति कथनेन अस्माकं कर्तव्यं किम्? इति ज्ञानं भवति। छात्रावस्थायां मनसा-वाचा-कर्मणा पठनम्-पाठनमेव अस्माकं परमो धर्मः। तत्र न कदापि अवहेलना करणीया। ''प्रथमे नार्जिता विद्या'' यदि छात्रावस्थायां विद्या नार्जिता तर्हि वयं भविष्यति काले दुःखमेव प्राप्नुयाम। पश्चात् संतापो भवति। अहो! मया विद्यार्थि-अवस्थायां शिक्षा नैव अधिगता। 'धर्म' शब्दस्य उच्चार्यमाणे सति धृति-क्षमा-दम-शौचम्-इन्द्रियनिग्रहः-विद्या-सत्यम्-अक्रोध' इत्येतेषां सद्गुणानां ज्ञानं भवति। एतेषां जीवने आचरणमेव धर्म इति पदेन वक्तुं शक्यते। भवन्तः जानन्ति संसारेऽस्मिन् महान् धर्मः

क इति? जिज्ञासायां ''मानवधर्म:'' एव ज्येष्ठ: श्रेष्ठ: प्रेष्ठ: वरिष्ठ: वर्त्तते। तदर्थम् ऋग्वेदे उपदिष्टमस्ति एकस्मिन् मन्त्रे—मनुर्भव! वयं सर्वेऽपि मिलित्वा सुशिक्षाम् अधीत्य मानवा भवितुम् इच्छाम:। ''मत्त्वा कर्माणि सीव्यतीति मनुष्य:'' इत्यनया परिभाषया अस्माभि: सर्वाणि शुभानि कार्याणि विचार्य एव करणीयानि। यथा अग्नेधर्म: क इति उच्चार्यमाने उष्णताधर्मस्य ज्ञानमनुमीयते। जलस्य धर्म क इति जिज्ञासायामुच्यते 'शैत्यम्' प्रतीयते एवमेव मनुजानां धर्म क इति वक्तव्ये मानवत्वम् एव ज्ञायते। सा मानवता न कदापि त्याज्या। एकेन महापुरुषेण मानवशब्दस्य परिभाषा प्रदत्ता—

''जो सबके सुख-दु:ख को अपने स्वयं के समान समझ लेवें वहीं मानव कहलाता है।''

यथाऽस्माभि सुख-दु:खस्य अनुभूति अनुभूयते एवमेव इतरेषाम् जीवने अपि इत्थमेव चिन्तनीयम्।

अन्येषां कृते यदि वयं दुखम् दद्म:, तर्हि तस्य कृते कष्टं भविष्यति अस्माकं कृतेऽपि कष्टं भविष्यति। अत: सर्वदा त्रिकालेष्वपि नैव कष्टं प्रदद्यात् कस्मैचिदपि। काम-क्रोध-लोभ-मोह-ईर्ष्या-असूया-इत्येतेषां दुर्गुणानाम् आचरणेन को लाभ अस्माकं जीवने इत्यपि अहर्निशं चिन्तनीयम्। एतदपि भवद्भि पठितं स्यात्—

एक: (बिच्छु) वृश्चिक: आसीत्। स नदी-जले निमग्न आसीत्। कश्चित् महात्मा तं हस्तयोर्मध्ये गृहीत्त्वा तं प्रति स्व औदार्यम् प्रकटयितुम् इच्छति स्म। तस्य स्वभाव: भवन्त जानन्त्येव कर्तनं करोति स्म स सदैव। केनचित् स महात्मा पृष्ट:। भवान् सर्वदा एवं किमर्थम् आचरसि। अयं कर्तयति वारम्वारं पुनरपि भवान् दयां कुरुते! तेन महात्मना उत्तरितम्—एष अस्य स्वभाव एव। प्रकृत्या स्वभावेन इदमेव करिष्यति। यदा स स्वधर्म-स्वभावं कर्तनं न त्यजति तदानीमहं कथं स्वदयाभावरूपधर्मं त्यजेयम्। अयमेव मानवधर्म: वर्तते। अस्य सर्वदा परिपालनम् अवश्यं कर्तव्यम्।

तृतीयं कर्तव्यमस्ति अस्माकम् ''स्वाध्यायान्मा प्रमद:'' स्वस्य अध्ययनम्-स्वाध्याय: इत्युच्यते स्व निरीक्षणम्। मम स्वजीवने के के दोषा: दुर्गुणा: सन्ति तेषां समीक्षणं सर्वदा कर्तव्यम्। मानवजीवने कानि-कानि दुर्गुणानि सन्ति। तानि सर्वाणि दूरीकरणीयानि।

अतएव यजुर्वेदे भगवता सच्चिदानन्दस्वरूपेण सृष्टयादौ उपदिष्टमस्ति—

**विश्वानि देव सवितर्दुरितानि परासुव।**

**यद् भद्रं तन्न आसुव॥** —यजु० ३०.३

हे देव! सकलजगदुत्पत्तिकर्त्ता। अस्माकं सम्पूर्णानि दुर्गुणानि, दुर्व्यसनानि, दुखानि च परासुव दूरङ्गमय। यद् भद्रं कल्याणकरं गुण-कर्म-स्वभावादिकं तन्न आसुव-प्रापय इत्येषा प्रार्थना अस्माभिः प्रतिदिनं पठ्यते। दुर्गुणानि बहूनि सन्ति—

यथा चोक्तं मनुना—

**पैशुन्यं साहसं द्रोहं ईर्ष्याऽसूयार्थदूषणम्।**

**वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः।** —मनु० ७.१४

प्रेयान्सः छात्राः! श्लोकेऽस्मिन् दुर्गुणानि प्रतिपादितानि पैशुन्यमिति कथनेन मानव-स्वभावस्य यद् सहजं दुर्गुणमस्ति चुगली करना, (निन्दा करना) साहसम्—अविचार्य एव कर्मकरणम्, द्रोहम्-अकारणादेव वैरभावः किमपि कारणं नास्ति तथापि वैरभावकरणम्। ईर्ष्या—अन्येषाम् उन्नतौ दुःखभावनाप्रकटीकरणम्, असूया अन्येषां गुणेषु दोषारोपणम्, दोषेषु गुणारोपणमिति असूया कथ्यते। अर्थदूषणम्—अनुचितेषु कार्येषु धनव्ययीकरणम्, वाचः दुरुपयोगः, अतिकठोरदण्डप्रदानम् इतीमानि दुर्गुणानि प्रतिपादितानि। अन्यान्यपि बहूनि सन्ति तानि यथायोग्यतयाऽवगन्तव्यानि।

पशुपक्षिणाम् जीवने यानि दुर्गुणानि सन्ति तानि सुष्ठु उपमया बोधितानि ऋषिभिः।

अथर्ववेदे भणितमस्ति—

**उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम्।**

**सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र॥** —अथर्व० ८.४.२२

अयि भो छात्रा! युष्माभि उलूकः (उल्लु) पक्षी अवलोकितः एव। स किं करोति दिवा न पश्यति। रात्रौ विचरति। सूर्यप्रकाशात् पलायते सः। अज्ञानम् नैव उचितम् प्रकाश एव अनुसरणीयः। तस्य यद् दुर्गुणं तत् अपाकरणीयम्। द्वितीयः पक्षी अस्ति—शुशुलूकः इति कथनेन 'भेडिया' इति उच्यते। तस्य स्वभावः कः स अत्यन्तं द्वेषभावनां रक्षति, क्रूरोऽस्ति। एषा द्वेषभावना दूरीकरणीया। श्वानः इति कथनेन हिन्दी-भाषायां 'कुत्ता' उच्यते यद्यपि स स्वामिभक्तोऽस्ति। तथापि तस्य जीवने दुर्गुणद्वयमस्ति—प्रथमं तावत् स्वजातिविद्रोहभावना तस्य जीवने प्रबलतमा वर्त्तते। कुक्कुरः कुक्कुरं दृष्ट्वा गुर्गुरायते। श्रुतमेवाऽस्माभिः। द्वितीयं दुर्गुणं चकास्ति—चाटुकारिताया भावना। कुत्ते की पूँछ टेढ़ी रही, इत्यनया उक्त्या दुराग्रहत्वं ज्ञायते। सम्यग् अवबोधिते सति अपि नैव अवगन्तुम् पारयति। एतत् दुर्गुणद्वयमस्माभिः दूरीकरणीयम्।

तृतीयः पक्षी अस्ति—'कोकयातुम्' हिन्दीभाषायाम् कथ्यते चिड़ा इति। एतस्य जीवने

गर्हिता कामभावना प्रबला भवति। कामः भवेत् परं मर्यादायाम्—तस्य शोभा वर्धते। मर्यादापरित्यागे सर्वं किम् अनर्थमयं भवति। चतुर्थः पक्षी अस्ति—सुपर्णयातुम् हिन्दीभाषायां गरुड़ इत्युच्यते अयं पक्षी अति अहंकारी भवति। अभिमानः श्रियं हन्ति। जीवनस्य कस्मिन्नपि क्षेत्रे अहंकार नैव उचितः। किमपि जीवने संप्राप्यते तदर्थं धन्यवादवचांसि सर्वदैव ज्ञापयनीयानि। अहंकारः किमर्थम्? को लाभ अनेन। संसारेऽस्मिन् अनेक धनाढ्या सन्ति, अनेके विद्वान्सः सन्ति। इत्येव अहर्निशं सततं चिन्तनीयम्। अनेन अहंकारो व्यपगतो भविष्यति।

पञ्चम पक्षी अस्ति—गृध्रयातुम् हिन्दीभाषायां गीध इति उच्यते। अयं पक्षी लोभी भवति। दूरस्थान् अपि पदार्थान् भूमौ पतितान् दृष्ट्वा गृह्णाति। अत एव उच्यते लोभः पापस्य कारणम्। एतानि पक्षिस्थानि दुर्गुणानि अवश्यं दूरीकर्त्तव्यानि। इदमेव स्व-अध्ययनं भविष्यति। आत्मपरीक्षणं निरीक्षणं समीक्षणमेव स्वाध्यायः वर्त्तते। अथ च यत्किमपि अस्माभि पठ्यते श्रूयते तदनुसारमेव आचरणीयम्। स्वाध्यायेन एव मानवत्वं आयाति। विद्यापठने न कदापि आलस्यं कर्तव्यम्। भवद्भिः पठितमेव—

**सुखार्थिनः कुतो विद्या, नास्ति विद्यार्थिनः सुखम्।**
**सुखार्थी वा त्यजेत् विद्याम्, विद्यार्थी वा त्यजेत् सुखम्॥**
**आलस्यं मदमोहौ च चापल्यं गोष्ठीरेव च।**
**स्तब्धता चाभिमानित्वं तथाऽत्यागित्वमेव च।**

एतेषां उपनिषत्प्रतिपादितानां वाक्यानां यावज्जीवनम् सेवनं कर्त्तव्यम्। येन च अस्माकं जीवनं दिव्यं भव्यं श्रेष्ठं ओजस्वि तेजस्वि भवेत्। इत्येव अस्माकं कामना। भवन्तः स्वजीवने अग्रे स्वपथं वर्धन्ताम्। इति विलिख्य विरमामि अहम्—

*—सचिवः*
*दिल्ली संस्कृत अकादमी,*
*दिल्लीसर्वकारः*

**—:: ०:: —**

॥ ओ३म् ॥

# भोजनं कीदृशं भवेत्?

—डॉ० सुधीरकुमारः

**आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवास्मृतिः।** आहारः शुद्धौ एव मनसः शुद्धिर्भवति, मानसिकशुचितया स्मृतिः ध्रुवा अर्थात् दृढी भवति। ऋषिमुनयः तमनुसरन्ति जीवन्ति च।

एकदा ऋषिकेश-नगरे महर्षिदयानन्दसरस्वती-महाभागस्य एकेन ब्रह्मचारिणा साधुभ्यां च सह मेलनम् अभवत्। दयानन्दः तैः सह टिहरीं प्रति अगच्छत्। इदं स्थानं विदुषां वयोवृद्धानां राजपण्डितानां च निवासार्थं प्रसिद्धम् अस्ति। तत्रैव निवसन् कोऽपि राजपण्डितः तत्र समायातः। स दयानन्दं स्वगृहं भोजनार्थं निमन्त्रितवान्। नियते समये स्वामिपादाः सन्देशवाहकेन तथा च एकेन ब्रह्मचारिणा सह आतिथेयं गृहस्थं प्रति अगच्छन्।

परन्तु प्रथमग्रासे मक्षिकापातः अर्थात् भोजन-समये प्रथमे ग्रासे एव मक्षिका पतनम् अभवत्, कथानुसारं गृहद्वारे एव दयानन्दः यद् बीभत्सं दृश्यं दृष्टवान् तद् दृष्टवा एव स कुपितो अभवन्। यतो हि तत्र एकः पण्डितः मांसखण्डं कर्तयित्त्वा अग्नौ समपर्यति स्म। एकं अस्थियुक्तं मांसम् पचति स्म, अपरश्च पक्वं पशुमासं छुरिकया तान्त्रिकी-क्रियायां संलग्नः आसीत्। एतादृशं बीभत्सं, भयानकं दृश्यं दृष्टवा सत्त्वगुणयुक्तः यतिप्रवरः आश्चर्यचकितः भूत्वा घृणया व्याकुलः अभूत्।

स्वामिदयानन्दं दृष्ट्वा गृहपतिः सत्वरम् उत्थित्वा तस्य अभिवादनञ्च कृत्वा तं शान्तिपूर्वकं गृहे प्रवेशार्थं निवेदनं कृतवान्। परन्तु सरस्वतीमहोदयः तस्य अभिवादनम् अस्वीकार्यं कृत्वा ततः प्रतिनिवृत्तवान्, कथितवान् च भवान् स्वकार्यं करोतु, अस्माकं कृते कष्टं मा कुरु।

किञ्चिद् कालपर्यन्तं गृहपतिः स्वामिदयानन्दस्य निवासस्थानं प्रति आगत्य खेदं प्रकटयन् सविनयेन अकथयत्—भवतां कृते एव मया एतादृशं दुर्लभम्, उत्तमोत्तमं, सुस्वादु-मांसभोजनं निर्मितम् आसीत्। दयानन्देन स्पष्टम् उक्तं यद्—भवतः अतिथिस्वागतं सत्कारं सर्वथा व्यर्थमेव अस्ति। भवान् तु मांसभोजी अहं तु केवलं मांसमात्रम् एव दृष्ट्वा अस्वस्थं व्याकुलो भवामि, मांसभक्षणं मासंस्पर्शं तु मम विषय एव नास्ति। अहं तु केवलं सात्त्विकम् अन्नं कन्दमूलं खादामि।

स्वामिदयानन्दस्य स्पष्टोक्तिं श्रुत्वा राजपण्डितः लज्जितः अभूत्। स स्वं गृहं अगच्छत् तथा दयानन्दार्थं च अनेकानि कन्दमूलानि फलानि समाहृत्य तस्य सेवार्थं स्थापितवान्।

**शिक्षाः**—आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः। विद्वान् दयायुक्तः मानवः सर्वदा आत्मवत् एवं प्राणिमात्रं पश्यति। यथा वयं स्वजीवनं सुखपूर्वकं, कष्टरहितं वाञ्छामः तथैव सर्वैरेव प्राणिनः जीवनस्य कामनायुक्ता भवन्ति। स्वकीया रसनातृप्ति-हेतोः कस्यापि जीवस्य प्राणोच्छेदः न कदापि करणीयः। सर्वेषु आत्मा अस्ति। अहिंसा परमो धर्मः। अहिंसा प्रतिष्ठायां तत्सन्निधौ वैरत्यागः। अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। स एव देवेषु गच्छति। राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे॥

**आहारनिद्रा भयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥**

*— सहायक-आचार्यः*
*विशिष्टसंस्कृताध्ययनकेन्द्रम्,*
*जवाहरलालनेहरूविश्वविद्यालयः, नव-देहली*

—:: ०:: —

# आश्रमचतुष्टयम्

**—अजीतकुमारः**

अस्माकं पूर्वजाः ऋषयः मनुष्यजीवनस्य सर्वविधविकासाय उन्नतये च आश्रम व्यवस्था कल्पितो। 'आश्रमा व्यवस्था' इत्यस्य अयम् आशयः यत् कस्मिन् वयसि कः आश्रमः समाश्रयणीयः।

तत्र वयं इमां सर्वाम् आश्रमव्यवस्थां गुरुशिष्यसंवादमाध्यमेन अवगच्छामः—

**गुरुः** — अद्य वयं आश्रम व्यवस्थायां ब्रह्मचर्याश्रमविषये ज्ञानं प्राप्स्यामः।

**शिष्यः** — महोदय! आश्रमशब्दस्य कः अर्थः?

**गुरुः** — यत्र नियमपूर्वकम् अनुशासनेन जीवनं याप्यते स आश्रमः कथ्यते।

**शिष्यः** — आश्रमाः कति भवन्ति गुरुमहोदय!

**गुरुः** — चत्वारः आश्रमाः भवन्ति—१. ब्रह्मचर्य-आश्रमः, २. गृहस्थ-आश्रमः, ३. वानप्रस्थ-आश्रमः, ४. संन्यास आश्रमः।

**शिष्यः** — ब्रह्मचर्याश्रमे किं क्रियते?

**गुरुः** — ब्रह्मचर्याश्रमे गुरोः पार्श्वे स्थित्वा ब्रह्मचारी भूत्वा-वेदादिसत्य-शास्त्राणाम् अध्ययनं क्रियते।

**शिष्यः** — अस्मिन् आश्रमो-अन्यत् किं किं क्रियते।

**गुरुः** — अस्मिन् आश्रमे—विशेषरूपेण शारीरिक-आत्मिक-विकासाय प्रयासः क्रियते। तद्यथा अध्यनेनात्मिक विकासः क्रियते—व्यायामप्राणायामादिभिश्च शारीरिक विकासः क्रियते।

**शिष्यः** — ब्रह्मचर्याश्रमः कियत्कालपर्यन्तं सेव्यते।

**गुरुः** — जन्मनः आरभ्य अल्पाल्पतया पञ्चविंशति (२५) वर्षपर्यन्तम्।

**शिष्यः** — गुरुमहोदय! 'ब्रह्मचारी' शब्दस्य विशिष्टम् अर्थं कथयन्तु।

**गुरुः** — ब्रह्म शब्दस्य अर्थः भवति ईश्वरः तथा 'चारी' शब्द। ब्रह्मचारी शब्दे पदद्वयम् अस्ति ब्रह्म इति प्रथमं पदम्, चारी इति द्वितीयया ब्रह्मणि अर्थात् ईश्वरे विचरति इति ब्रह्मचारी यः सर्वदा ईश्वरस्य चिन्तनं कुर्वन् आत्मोन्नतये प्रयासं करोति स ब्रह्मचारी भवति।

**शिष्यः** — किं ब्रह्मचारी शब्दस्य अन्यः अपि अर्थः वर्त्तते।

**गुरुः** — एकः अन्यः अर्थः भवति संयमी, अर्थात् सर्वाणि इन्द्रियाणि वशे स्थापयति सः अपि ब्रह्मचारी कथ्यते।

**शिष्यः** — गुरुमहोदयः अद्य तु वयं ब्रह्मचर्याश्रमविषये बहु किमपि ज्ञातवन्तः। परन्तु एका अन्या जिज्ञासा वर्त्तते मम मनसि।

**गुरुः** — आम् सम्यक् अस्ति। कथयतु—

**शिष्यः** — ब्रह्मचर्याश्रमस्य सर्वप्रमुखम् उद्देश्यं किम् अस्ति।

**गुरुः** — विद्यायाः अधिकाधिक सञ्चयः एवं स्वस्थ-शरीरनिर्माणाय-व्यायामः।

**शिष्यः** — धन्यवादः गुरुमहोदयः!
अग्रिमाङ्केषु अन्याश्रमाणां विषयेपठिताम्।

*— शोधच्छात्रः*
*दिल्लीविश्वविद्यालयः*

—:: ०:: —

# संस्कृत महाकाव्यों की उत्पत्ति एवं विकास

**—डॉ० जगतबहादुरशर्मा**

देववाणी संस्कृत विश्व की सम्पूर्ण भाषाओं की शिरोमणि उज्ज्वल विचारों की सुन्दर मञ्जूषा, प्राचीन भारत वर्ष के साहित्यिक, सांस्कृतिक, धार्मिक, ऐतिहासिक, राजनैतिक, सामाजिक जीवन की कुंजिका, पुरुषार्थ चतुष्टय की निर्मल दर्पण है। संस्कृत साहित्य भारत का गौरव है। इस संस्कृत साहित्य में हमें अपने गौरवपूर्ण अतीत की झाँकी देखने को मिलती है।

भारतीय काव्य के निर्माण की प्रेरणा कवियों को रामायण तथा महाभारत जैसे श्रेष्ठ महाकाव्यों के अध्ययन से प्राप्त हुई है। महाकाव्य के उद्‌भव और विकास का निरूपण अधोलिखित है–

महाकाव्य के विकास का इतिहास हम दो रूपों में करते हैं।

(क) रूपगत विकास

(ख) शैलीगत विकास

(क) रूपगत विकास के अन्तर्गत सबसे पहले वैदिक काल आता है जिनमें आख्यान, देवस्तुति, भावप्रधानता इत्यादि आते हैं।

वीरमहाकाव्य के अन्तर्गत रामायण, महाभारत एवं आाख्यान तत्त्वों की प्रधानता आती है।

लौकिक महाकाव्य में कालिदास एवं परवर्ती काव्यकारों ने भावपक्ष की अपेक्षा कलापक्ष की उदात्तता पर बल दिया है।

महाकाव्य के शैलीगत विकास में प्रसादात्मक शैली में रामायण, महाभारत, कालिदास, अश्वघोष आदि के काव्यों में प्राप्त होती है।

अलंकारात्मक शैली, भारवि, माघ, श्रीहर्ष आदि के काव्यों में प्राप्त होती है।

श्लेषात्मक शैली, द्व्यर्थक काव्यों में प्राप्त होती है। द्व्यर्थक काव्य धनंजयकृत–द्विसन्धानकाव्य, कविराजसूरिकृत–राघवपाण्डवीय, राघवचूड़ामणिदीक्षितकृत–राघवायादव-पाण्डवीय।

महाकाव्यों का उद्‌भव ऋग्वेद के आख्यान सूक्तों–इन्द्र, वरुण, विष्णु और ऊषा आदि के स्तुतिमंत्रों तथा नराशंसी गाथाओं से हुआ है। ब्राह्मण आदि ग्रन्थों में इन

अख्यान आदि का विस्तृत रूप मिलता है। यही स्वरूप आगे चलकर महाकाव्य के रूप में बदल गया। क्रौञ्चवध से दु:खी मनवाले महाकवि वाल्मीकि के वाणी से निकला व्याध-शाप **( मा निषाद प्रतिष्ठां त्वम्... )** वाल्मीकिकृत रामायण के रूप में आदि काव्य के गौरव को प्राप्त कर लिया तथा इसके प्रणेता वाल्मीकि को आदिकवि का गौरव प्राप्त हुआ। वाल्मीकिकृत रामायण तथा रामायण के बाद वेदव्यासकृत महाभारत भी परवर्ती कवियों का उपजीव्य काव्य बन गये।

भारतीय परम्परा वेद को ही काव्य, शास्त्र आदि का उत्पत्तिस्थल मानती रही है। वैदिक मनीषी की सर्वाधिक मनोहर कल्पनायें ऋग्वेद के उषस् सूक्तों में समस्त काव्यात्मक उन्मेष के साथ निकली हुई है। देवस्तुति के अतिरिक्त नाराशंसियों में भी काव्यात्मक रूप झलकता है। तत्कालीन उदार राजाओं की प्रशंसा में नितान्त अतिशयोक्तिपूर्ण प्रशस्तियाँ नाराशंसी कहलाती है। ऐतरेयब्राह्मण की सप्तम पंचिका में शुन:शेप आख्यान एवं अष्टम पंचिका में **'ऐन्दमहाभिषेक'** के अनेक अंश सुन्दर काव्य की छटा बिखेरते हैं। इस प्रकार सम्पूर्ण वैदिक साहित्य में काव्यतत्त्वों का अस्तित्त्व तो दृष्टिगोचर होता है किन्तु महाकाव्य शैली का पूर्ण परिपाक कहीं पर भी दृष्टिगोचर नहीं होता। संस्कृत महाकाव्य धारा की मूल उद्गम स्थली आदिकाव्य रामायण ही है, जिसमें महाकाव्य की सभी विशेषताओं का दर्शन हो जाता है।

संस्कृत साहित्य के महाकाव्यों की विकास-परम्परा में संस्कृत व्याकरण के 'मुनित्रय' पाणिनि, वररुचि तथा पतंजलि का स्थान अत्यधिक महत्त्वपूर्ण है। आचार्य रुद्रट द्वारा रचित 'काव्यालंकार सूत्र' के टीकाकार नेमिसाधु ने पाणिनि द्वारा रचित महाकाव्य 'जाम्बवतीजय' या 'पातालविजय' का उल्लेख किया है। पतंजलि के महाभाष्य (ईस्वी पूर्व द्वितीय शती) में काव्यगुणों से सम्पन्न पद्य उपलब्ध होते हैं। इन सब प्रमाणों के आधार पर महाकाव्य का उदय ईस्वी पूर्व की अष्टम शती में ही पाणिनि द्वारा हो चुका था। सूक्तिग्रन्थों में राजशेखर ने पाणिनि को 'व्याकरण' तथा 'जाम्बवतीजय' दोनों का रचयिता माना है-

**'नम:पाणिनये तस्मै यस्मादाविरभूदिह। आदौ व्याकरणं काव्यमनु जाम्बवतीजयम्।'**

वररुचि के नाम से भी अनेक श्लोक विभिन्न सुभाषित संग्रहों में प्राप्त होते हैं। पतंजलि ने वररुचि के बनाये गये किसी महाकाव्य (वाररुचं काव्यं) का उल्लेख महाभारत में किया है-

**'यथार्थता कथं नाम्नि या भूद वररुचेरिह। व्यधत्त कण्ठाभरणं यः सदारोहणप्रियः'॥**

वररुचि-प्रणीत महाकाव्य का नाम 'कण्ठाभरण' है। वररुचि ने पाणिनि का अनुकरण 'वार्तिक' लिखकर ही नहीं किया प्रत्युत काव्यरचना से उसकी पूर्ति की।

पतंजलि (१५० ई.पूर्व) ने अपने महाभाष्य में दृष्टांत के रूप में बहुत से श्लोकों या श्लोक खण्डों को उद्‌धृत किया जिनके अनुशीलन से संस्कृत-काव्यधारा की प्राचीनता सिद्ध होती है। काव्य अपने सुन्दर निर्माण तथा रचना के निमित्त शान्त वातावरण, आर्थिक समृद्धि तथा सामाजिक शान्ति की जितनी अपेक्षा रखता है उतनी ही वह किसी गुणग्राही आश्रयदाता की प्रेरणा की भी। प्राचीन भारतवर्ष के इतिहास में वह युग शकों के भयंकर आक्रमणों से भारतीय जनता, धर्म तथा संस्कृति के रक्षक मालव संवत के ऐतिहासिक संस्थापक शकारि मालवगणाध्यक्ष विक्रमादित्य का है। इसी युग में भारतीय संस्कृति के उपासक कालिदास का काव्याकाश में उदय होता है। कालिदास को वस्तुतः प्रौढ़, परिष्कृत, प्रांजल एवं मनोज्ञ काव्यशैली का प्रवर्तक कहा जा सकता है। कालिदासजी ने जो काव्यादर्श उपस्थित किया वह परकालीन कवियों एवं लेखकों के लिये अनुकरणीय हुए।

संस्कृत महाकाव्य को तीन समूहों में विभाजित किया जा सकता है—

१. कालिदास के पहले का समय जिसमें कथानक की प्रधानता रही। रामायण और महाभारत इस समय के आदर्श काव्य हैं।

२. कालिदास का समय जिसमें आडम्बरों से रहित, सहज एवं सरल ढंग से भाव तथा कला का सुन्दर समन्वय स्थापित करके काव्य की धारा प्रवाहित हुई। जैसे—'रघुवंशम्' और 'कुमारसंभवम्' आदि।

३. कालिदास के बाद का समय जिसमें काव्यलेखन भाषा और भाव की दृष्टि से कठिन होता हुआ दिखाई पड़ता है जिसकी परम्परा भारवि से प्रारम्भ होकर 'श्रीहर्ष' की रचना तक अपनी चरम सीमा पर पहुँच जाती है और एक वैदग्ध तथा पाण्डित्यपूर्ण परम्परा का निर्माण होता है।

विद्वानों ने कालिदास के पूर्ववर्ती कवि व्यास और वाल्मीकि को ऋषिकोटि में माना है। इनकी रचनाओं में सरलता और स्वाभाविकता का पुट है। संस्कृत साहित्याकाश में महाकवि 'भारवि' का नाम विशेष उल्लेखनीय रहेगा क्योंकि संस्कृत के महाकाव्यों की परम्परा में समय और कवित्व दोनों दृष्टियों से कालिदास के बाद भारवि का प्रमुख

स्थान है। इनका एक मात्र कालजयी महाकाव्य 'किरातार्जुनीयम्' है जो अपनी अर्थपूर्ण उक्तियों के लिए विद्वान्मण्डली में लोकप्रिय हो गया। इसके बाद उसी स्तर का महत्त्वपूर्ण महाकाव्य माघ का 'शिशुपालवधम्' है। संस्कृत-महाकाव्यों की परम्परा में कालक्रम के अनुसार सबसे अन्तिम और महत्त्वपूर्ण काव्य बारहवीं शताब्दी के उत्तरार्द्ध में लिखा गया महाकवि श्रीहर्ष का 'नैषधीयचरितम्' है। इन्होंने अपने महाकाव्य को तत्कालीन समाज में प्रचलित परम्परा के अनुरूप ही आगे बढ़ाया और उस शैली के विकास को चरम तक पहुँचा दिया।

संक्षेप में महाकाव्य के विकास पर दृष्टिपात करने से ज्ञात होता है कि आरम्भिक युग में नैसर्गिकता का ही काव्य में मूल्य था, वही गुण आदर की दृष्टि से देखा जाता था। कालान्तर में कवियों ने अपने काव्य में अक्षराडम्बर तथा अंलकारविन्यास की ओर दृष्टिपात किया और उन्हें ही काव्य का जीवन मानने लगे।

**सन्दर्भग्रन्थ-सूची**


1. कपिलदेव द्विवेदी-संस्कृत साहित्य का इतिहास।
2. वाल्मीकि रामायण।
3. महाभारत, आदिपर्व (1/68-69)
4. ऋग्वेदः उषस् सूक्त।
5. संस्कृत शास्त्रों का इतिहास (वाराणसी, 1969, पृष्ठ 416)
6. राजशेखर–सूक्तिग्रन्थ।
7. पतंजलि–महाभाष्य (4/2/65)
8. आचार्य बलदेव उपाध्याय–संस्कृत साहित्य का इतिहास, पृष्ठ 137-138
9. उपाध्याय, गुप्त साम्राज्य का इतिहास–2, पृष्ठ 100
10. ए.ए. मैक्डोनेल–ए हिस्ट्री ऑफ संस्कृत लिटरेचर, पृष्ठ 343
11. भारतीय साहित्य शास्त्र, दूसरा खण्ड, पृष्ठ 186, 196
12. डॉ. व्यास–संस्कृत-कविदर्शन
13. कीथ–ए हिस्ट्री ऑफ संस्कृत लिटरेचर, पृष्ठ 140
14. गैरोला वाचस्पति, संस्कृत साहित्य का इतिहास, पृष्ठ 756



*— २५/२, ईस्ट पटेलनगर:,*

*नवदिल्ली-११०००८*

# कालः अश्वो वहति

—अजीतकुमारः

अस्मिन् सुभाषिते कालस्य अर्थात् समयस्य महत्त्वविषये कथितम् अस्ति।

प्रियछात्राः!

सर्वे: अपि विद्यार्थिजीवने सर्वदा समयस्य सदुपयोगः कर्त्तव्य। छात्रजीवने उन्नतेः विकासस्य च अधिकाः अवसराः भवन्ति। अतः समयस्य अधिकः उपयोगः विकासस्य कृते कर्त्तव्यः। यः छात्रः छात्रजीवने समयं व्यर्थं करोति, स पश्चात् दुःखितो भवति। भवन्तः महात्मागान्धिमहोदयं तु जानन्ति एव। ते सर्वदा समयस्य सदुपयोगं कुर्वन्ति स्म। अत एव ते अद्य अस्माकं पूजनीयाः सन्ति। एवम् एव अनेके महापुरुषाः समयस्य सदुपयोगं कृत्वा जीवने श्रेष्ठानि कार्याणि कुर्वन्ति स्म। अतः ते अतिप्रसिद्धाः सन्ति। समयः अश्ववत् धावति। सः कस्य अपि प्रतीक्षां न करोति। नष्टः समयः पुनः न आगच्छति। अतः यदि वयं उन्नतिम् इच्छामः चेत् क्षणमात्रम् (एक सेकेण्ड) अपि व्यर्थं न करणीयम्।

कथितम् अपि—

**क्षणशः कणशश्चैत विद्याम् अर्थञ्च सञ्चयेत्।**
**क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्॥**

अस्य अयम् अर्थः यत् छात्रः प्रतिक्षणं (प्रत्येकसेकेण्ड) विद्या सञ्चयस्य प्रयासं कुर्यादिति।

*— शोधच्छात्रः*
*दिल्लीविश्वविद्यालयः*

—:: ०:: —